# പ്രയോഗവല്ലരി

**സംസ്കൃത അഭ്യാസപുസ്തകം, ഹൈസ്കൂൾ**

# प्रयोगवल्लरी

*उच्चस्तरीया अभ्यासपुस्तिका*

## PRAYOGAVALLARI

***Sanskrit workbook for H.S.***


*Published by*

**DEPARTMENT OF GENERAL EDUCATION**
**KERALA**

**2012**

***Prepared by*** :

***Directorate of Public Instruction***

© Department of General Education • Government of Kerala • 2012

# आमुखम्

आशयविनिमये भाषायाः प्राधान्यम् अद्वितीयमेव भवति इति विदितमेव सर्वेषाम्। भाषाप्रयोगेणैव आशयविनिमयशक्तिः वर्धेत इत्यनुभवसिद्धम्। छात्राणां भाषाप्रयोगनैपुणीवर्धनाय बहून् अवसरान् एकत्र समावेश्य क्रमानुगतेन विधिनात्र प्रवर्तनानि समाकलितानि वर्तन्ते। भाषायाः अणुरूपः खलु वर्णः। वर्णोच्चारणविधेरारभ्य वाक्यप्रयोगपर्यन्तं भाषाप्रयोगाः पुस्तके सङ्कलिताः।

भाषाप्रयोगेषु श्रद्धेयानांशान् प्रथममेव प्रस्तूय तत्तदंशानां बलीकरणाय बहवः अभ्यासाः छात्राणां कृते समायोजिताः सन्ति। कक्ष्यायाम् अध्यापकस्य निर्देशानुसारं यथाकालं इमेऽभ्यासाः छात्रैः करणीयाः अवतारणीयाश्च। **'प्रयोगवल्लरी'**मिमां सोत्साहमुपयुज्य भाषाप्रयोगपटुतां वर्धयन्तामिति आशंस्ये।

पुस्तकस्यास्य परिष्करणाय संस्कृतपिपठिषूणाम् अध्यापकानां छात्राणां च निर्देशान् अपि सानन्दमामन्त्रये।

भवदीयः

अनन्तपुरी
16.05.2012

निदेशकः
सामान्यशिक्षाविभागः केरलाः

# विषयानुक्रमणिका


| *अभ्याससूची* | | *पुटसंख्या* |
|---|---|---|
| 1. | वर्णविकाराः। | 5 |
| 2. | विशेषविशेष्याणि। | 23 |
| 3. | क्तवत्वन्तं क्तान्तम्। | 27 |
| 4. | तव्य - अनीय - य। | 31 |
| 5. | शतृ - शानच्। | 33 |
| 6. | णिजन्तम्। | 46 |
| 7. | कारकाणि। | 52 |
| 8. | प्रयोगाः। | 88 |
| 9. | समासः। | 95 |
| 10. | वृत्तानि। | 106 |


"एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः
स्वर्गे लोके कामधुग्भवति।।"

# प्रथमोऽध्यायः

# वर्णविकाराः

## सन्धिः

उच्चारणसौकर्यार्थं सन्धिः विधीयते। अतः एव वर्णानाम् उच्चारणस्थानानि छात्रैरवधेयानि।

स्वराः व्यञ्जनानि च 'वर्णाः' इत्युच्यन्ते। वर्णानाम् उच्चारणस्थानानुसारेण ते कण्ठ्याः, तालव्याः, मूर्धन्याः, दन्त्याः, ओष्ठ्याः, अनुनासिकाः, जिह्वामूलीयाः, कण्ठतालव्यः, कण्ठोष्ठ्यः च भवन्ति।

वर्णाः तेषाम् उच्चारणस्थानानि च अधः प्रदत्तानि।

| *वर्णाः* | *उच्चारणस्थानम्* |
|---|---|
| अ आ क ख घ घ ङ ह विसर्ग (:) | कण्ठः |
| इ ई च छ ज झ ञ य श | तालुः |
| ऋ ॠ ट ठ ड ढ ण र ष | मूर्धा |
| ऌ त थ द ध न ल स | दन्ताः |
| उ ऊ प फ ब भ म | ओष्ठौ |
| ञ म ङ ण न | नासिका |
| ए ऐ | कण्ठतालुः |
| ओ औ | कण्ठोष्ठम् |
| व | दन्तोष्ठम् |

- प्रदत्तानां वर्णानाम् उच्चारणस्थानानि विवेचयत -

1. ख ..................... 2. ई .....................

3. प ..................... 4. ञ .....................

5. ह ..................... 6. ट .....................

7. ॠ ..................... 8. ष .....................

9. : ..................... 10. अ .....................

- व्यञ्जनवर्णानां क्रमीकरणमधो दीयते।

| वर्ग प्रथमाः | वर्ग द्वितीयाः | वर्ग तृतीयाः | वर्ग चतुर्थाः | वर्ग पञ्चमाः | वर्ग | मध्यमाः | ऊष्माणः |
|---|---|---|---|---|---|---|---|
| क | ख | ग | घ | ङ | कवर्गः | य | श |
| च | छ | ज | झ | ञ | चवर्गः | र | ष |
| ट | ठ | ड | ढ | ण | टवर्गः | ल | स |
| त | थ | द | ध | न | तवर्गः | व | ह |
| प | फ | ब | भ | म | पवर्गः | | |

- पट्टिकानुसारं प्रदत्तानां प्रश्नानाम् उत्तराणि लिखत -

वर्गतृतीयाः वर्णाः के? ..........................

तवर्गेषु अनुनासिकवर्णः कः? ..........................

अन्तस्थाः/मध्यमाः कति? के च ते ..........................

पञ्चवर्गाक्षरेषु अतिखराः के? ..........................

व्यञ्जनवर्णाः कति वर्तन्ते? ..........................

वर्गाक्षराणि कति? वर्गाणां नाम च लिखतु। ..........................

द्वयोः वर्णयोः मेलनेन वर्णस्य यत्परिवर्तनं जायते सः सन्धिः। पूर्वपदस्य अन्तिमवर्णेन सह उत्तरपदस्य आदिमवर्णस्य मेलनम् उच्चारणसौकर्याय एव भवति।

यथा - तत्र + आगतः - तत्रागतः।

उक्तं च - संहितैकपदे नित्या नित्या धातूपसर्गयोः।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते।।

सामान्यतः सन्धिः त्रिविधः भवति। यथा - क. स्वरसन्धिः

ख. व्यञ्जनसन्धिः

ग. विसर्गसन्धिः इति।

## क. स्वरसन्धिः

स्वरवर्णानां मेलनेन जायमानः वर्णविकारः एव स्वरसन्धिः। अचः एव स्वराः।

**अच् - अ आ इ ई उ ऊ ऋ ॠ लृ ए ऐ ओ औ**

एतयोः कयोश्चन द्वयोः परस्परमेलनेन वर्णविकाराः जायन्ते। ते च सप्तधा भवन्ति।

1. सवर्णदीर्घः
2. गुणसन्धिः
3. वृद्धिसन्धिः
4. अयादेशसन्धिः
5. यण् सन्धिः
6. पररूपसन्धिः
7. पूर्वरूपसन्धिः

## 1. सवर्णदीर्घः सन्धिः (आ, ई, ऊ, ॠ, लॄ)

अकारयोः द्वयोः मेलनेन दीर्घः आकारः यत्र आदेशत्वेन जायते तत्र सवर्णदीर्घसन्धिः भवति।

यथा - तत्र आगत्य - तत्रागत्य (अ, आ + अ, आ) एवम् इकार उकारादीनां च सवर्णदीर्घः भवत्येव।

(सूत्रम् - अकः सवर्णे दीर्घः)

*अधः प्रदत्तां पट्टिकां पठत -*

| पूर्वपदस्य अन्तिमवर्णः | परपदस्य आदिमवर्णः | द्वयोः एकादेशः | पूर्वपदम् | उत्तरपदम् | सन्धियुक्तपदम् |
|---|---|---|---|---|---|
| अ | अ | आ | तत्र | अनयत् | तत्रानयत् |
| आ | अ | आ | तया | अचिन्तयत् | तयाचिन्तयत् |
| अ | आ | आ | तेन | अनीतम् | तेनानीतम् |
| आ | आ | आ | तथा | आश्रित्य | तथाश्रित्य |
| इ | इ | ई | इति | इच्छति | इतीच्छति |
| ई | इ | ई | मही | इन्द्रः | महीन्द्रः |
| ई | ई | ई | मही | ईश्वरः | महीश्वरः |
| इ | ई | ई | इति | ईरयित्वा | इतीरयित्वा |
| उ | उ | ऊ | लघु | उत्तरम् | लघूत्तरम् |
| उ | ऊ | ऊ | वस्तु | ऊर्ध्वम् | वस्तूर्ध्वम् |
| ऊ | ऊ | ऊ | वधू | ऊरुकम् | वधूरुकम् |
| ऊ | उ | ऊ | वधू | उपदेशः | वधूपदेशः |
| ऋ | ऋ | ॠ | पितृ | ऋणम् | पितॄणम् |

**अभ्यासः १**

उदाहरणानुसारं सन्धत्त -

उदाः तत्र + अचिरेण - तत्राचिरेण (अ + अ + आ)

1. यदा + आरम्भः - .................. ....................
2. मम + अधिकारः - .................. ....................
3. लता + अवोचत् - .................. ....................
4. नदी + इयम् - .................. ....................
5. इति + ईर्ष्यति - .................. ....................

6. गौरी + इच्छति - .................. ....................

7. आयुषा + आर्जितम् - .................. ....................

8. तथा + अपि - .................. ....................

समानसन्धियुक्तपदानि पञ्च लिखत। पदच्छेदं च लिखत।

.................................. - .................. + ..................।

.................................. - .................. + ..................।

.................................. - .................. + ..................।

.................................. - .................. + ..................।

.................................. - .................. + ..................।

## 2. गुणसन्धिः (आ, ए, ओ)

अ, आ एतयोः पश्चात् इ उ ऋ वर्णाः भवन्ति चेत् क्रमशः ए ओ अर् एते भवन्ति। एषः गुणसन्धिरिति अभिधीयते। सूत्रम् - आद्गुणः।

*प्रक्रिया उदाहरणानि च -*

| पूर्वपदस्य अन्तिमवर्णः | परपदस्य आदिमवर्णः | एकादेशः | पूर्वपदम् | उत्तरपदम् | संश्लिष्टपदम् |
|---|---|---|---|---|---|
| अ | इ | ए | तेन | इव | तेनेव |
| अ | उ | ओ | तव | उपदेशः | तवोपदेशः |
| आ | इ | ए | यथा | इच्छसि | यथेच्छसि |
| अ | ई | ए | अनेन | ईप्सितम् | अनेनेप्सितम् |
| अ | ऋ | अर् | देव | ऋषि | देवर्षिः |

**अभ्यासः १**

गुणसन्धियुक्तानि पञ्चपदानि लिखत -

उदाः - यथा + इच्छा - यथेच्छा

.................. + .................. - ....................................।

.................. + .................. - ....................................।

.................. + .................. - ....................................।

.................. + .................. - ....................................।

.................. + .................. - ....................................।

## 3. वृद्धिसन्धिः (ए ऐ)

अ / आकारस्य पश्चात् ए ऐ ओ औ वर्णाः भवन्ति चेत् ऐ औ एतौ एकादेशौ भवतः। एषः वृद्धिसन्धिः।

(सूत्रम् - वृद्धिरेचि।)

अ / आ + ए / ऐ - ऐ

अ / आ + ओ / औ - औ

*प्रक्रिया उदाहरणानि च -*

| पूर्वपदस्य अन्तिमवर्णः | परपदस्य आदिमवर्णः | एकादेशः | पूर्वपदम् | उत्तरपदम् | संश्लिष्टपदम् |
|---|---|---|---|---|---|
| अ | ए | ऐ | तेन | एवम् | तेनैवम् |
| आ | ए | ऐ | यथा | एव | यथैव |
| अ | ओ | औ | व्रज | ओकाः | व्रजौकाः |
| आ | ओ | औ | महा | ओषधिः | महौषधिः |
| आ | औ | औ | यथा | औचित्यम् | यथौचित्यम् |
| अ | औ | औ | तेन | औषधेन | तेनौषधेन |

**अभ्यासः १**



*समानसन्धियुक्तानि पञ्चपदानि पट्टिकायां निवेशयत -*

| सन्धियुक्तपदं | पूर्वपदं | उत्तरपदं | वर्णविकारः |
|---|---|---|---|
| ...................... | ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... | ...................... |

## 4. अयादेशसन्धिः (अय् आय् अव् आव्)

ए ऐ ओ औ एतेषां वर्णानां स्वरवर्णेषु परेषु पूर्वोक्तवर्णानां स्थानेषु अय्, आय्, अव्, आव् एते क्रमाद् आदेशाः भवन्ति। एषः अयादेशसन्धिः। (सूत्रम् - एचोऽयवायावः।)

आदेशे वर्तमानौ यकार/वकारः वा लोपमेति च।

*प्रक्रिया उदाहरणानि च -*

| पूर्वपदस्य अन्तिमवर्णः | परपदस्य आदिमवर्णः | एकादेशः | पूर्वपदम् | उत्तरपदम् | संश्लिष्टपदम् |
|---|---|---|---|---|---|
| ए | इ | अय् | हरे | इति | हरयिति/ हर इति |
| ऐ | अ | आय् | दास्यै | अयच्छत् | दास्यायायच्छत्/ दास्या अयच्छत् |
| ओ | ए | अव् | गुरो | एवम् | गुरवेवम्/गुर एवम् |
| औ | अ | आव् | पितरौ | अत्र | पितरावत्र/ पितरा अत्र |

**अभ्यासः १**

*समानसन्धियुक्तानि पञ्चपदानि लिखत -*

| पदम् | पूर्वपदम् | उत्तरपदम् |
|---|---|---|
| ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... |

## 5. यण् सन्धिः (य् र् ल् व्)

इ उ ऋ लृ वर्णानां पश्चात् स्वरवर्णाः भवन्ति चेत् एषां क्रमाद् य् व् र् ल् एते आदेशाः स्युः। एषः यण् सन्धिः भवति। (सूत्रम् - इको यणचि।)

*प्रक्रिया उदाहरणानि च -*

| पूर्वपदस्य अन्तिमः वर्णः | उत्तरपदस्य आदिमवर्णः | आदेशः | पूर्वपदं | उत्तरपदं | सन्धियुक्तपदम् |
|---|---|---|---|---|---|
| इ | अ | य् + अ | दधि | अस्य | दध्यस्य |
| उ | अ | व् + अ | मधु | अत्र | मध्वत्र |
| ऋ | आ | आ + अर् | पितृ | आदेशः | पित्रादेशः |
| लृ | आ | ल् + आ | लृ | आकृतिः | लाकृतिः |

**अभ्यासः १**

*यण् सन्धियुक्तानि पञ्चपदानि पट्टिकायां योजयत -*

| पदम् | पूर्वपदम् | उत्तरपदम् | आदेशः |
|---|---|---|---|
| उदाः इत्यवोचत् | इति | अवोचत् | य् |
| ...................... | ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... | ...................... |

| | | | |
|---|---|---|---|
| ...................... | ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... | ...................... |

## ख . विसर्गसन्धिः

विसर्गस्य (स् र्) व्यञ्जनैः स्वरैः च मेलनेन जायमानः विकारः एव विसर्गसन्धिः। विसर्गस्य विकाराश्रयेण अस्य सन्धेः वैविध्यमस्ति।

1. अकारात् परः विसर्गः ह्रस्व - अकारे वर्गतृतीयचतुर्थपञ्चमेषु तथा य र ल व ह एतेषु च परेषु उकारत्वमेति।

यथा - रामः अत्र - राम उ अत्र - रामोऽत्र।

बालः याति - बाल उ याति - बालो याति।

विप्रः + दीनः - विप्रो दीनः।

जनः + हतः - जनो हतः।

रामः + वन्द्यः - रामो वन्द्यः।

केशवः + नाम - केशवो नाम।

धर्मः + जयति - धर्मो जयति।

**अभ्यासः १**

*समानसन्धियुक्तानि पञ्चपदानि लिखत -*

| सन्धियुक्तपदम् | पूर्वपदम् | उत्तरपदम् |
|---|---|---|
| ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... |
| ...................... | ...................... | ...................... |

**अभ्यासः २**

2. **अधः प्रदत्तानां पदानां पदच्छेदं लिखत -**

| | | | | |
|---|---|---|---|---|
| अधोऽसौ | - | ................... | + | ...................। |
| रामो नाम | - | ................... | + | ...................। |
| सोऽवदत् | - | ................... | + | ...................। |
| ततो गत्वा | - | ................... | + | ...................। |
| सोदरोऽपि | - | ................... | + | ...................। |

3. आकारात् परस्य विसर्गस्य वर्गतृतीयचतुर्थपञ्चमेषु परेषु लोपः भवति। आकारात् परस्य विसर्गस्य हकारे यकारे च परे अपि लोपः भवति।

यथा - बालाः + गताः - बाला गताः।

जनाः + वाञ्छन्ति - जना वाञ्छन्ति।

वानराः + हताः - वानरा हताः।

देवाः + यान्ति - देवा यान्ति।

खगाः + डयन्ते - खगा डयन्ते।

**अभ्यासः ३**

4. समानसन्धियुक्तपदानि लिखत (पञ्चपदानि) -

| | | | | |
|---|---|---|---|---|
| ..................................... | - | ................... | + | ...................। |
| ..................................... | - | ................... | + | ...................। |
| ..................................... | - | ................... | + | ...................। |
| ..................................... | - | ................... | + | ...................। |
| ..................................... | - | ................... | + | ...................। |

5. अकारं विहाय स्वरात्परः विसर्गः स्वरेषु मृदुव्यञ्जनेषु च परेषु र् इत्येव (रेफः) भवति।

यथा - हरिः + इति - हरिरिति।

गुरुः + जयति - गुरुर्जयति।

**अभ्यासः ४**

*अधः प्रदत्तानां पदानां पदच्छेदं लिखत -*

| | | | | |
|---|---|---|---|---|
| रविर्भाति | - | .................. | + | ..................। |
| भिक्षुर्वदति | - | .................. | + | ..................। |
| वायुर्नः | - | .................. | + | ..................। |
| बलिर्विजयते | - | .................. | + | ..................। |
| मुनेर्भ्राता | - | .................. | + | ..................। |

**6.** विसर्गस्य चकारे तकारे च परे शकारसकारौ क्रमाद् स्तः।

यथा - कृष्णः + तदा - कृष्णस्तदा।

हरिः + तत्र - हरिस्तत्र।

जयः + च - जयश्च।

तयोः + च - तयोश्च।

**अभ्यासः ५**

*समानसन्धियुक्तपदानि पञ्चपदानि लिखत -*

| **सन्धियुक्तपदम्** | **पूर्वपदम्** | **उत्तरपदम्** |
|---|---|---|
| .................... | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |

**7.** विसर्गस्य श् ष् स् एतेषु परेषु श् ष् स् इत्येव रूपं वा सम्पद्यते।

(सूत्रम् - विसर्जनीयस्य सः। वा शरि।)

यथा - लोकाः + समस्ताः - लोकास्समस्ताः / लोकाः समस्ताः।

बालः + शेते - बालश्शेते / बालः शेते।

नराः + षट् - नराष्षट् / नराः षट्।

**अभ्यासः ६**

*समानसन्धियुक्तानि पञ्चपदानि लिखत -*

| | | | | |
|---|---|---|---|---|
| .................. | + | .................. | - | ....................................। |
| .................. | + | .................. | - | ....................................। |
| .................. | + | .................. | - | ....................................। |
| .................. | + | .................. | - | ....................................। |
| .................. | + | .................. | - | ....................................। |

8. एतत् (एषः) तत् (सः) शब्दयोः विसर्गस्य व्यञ्जनाक्षरेषु परेषु नित्यं लोपः भवति।

(सूत्रम् - एतत्तदोः सुलोपोऽकोरनञ्समासे हलि।)

यथा - सः + बालः - स बालः।

एषः + राजीवः - एष राजीवः।

**अभ्यासः ७**

*समानसन्धियुक्तानि पञ्चपदानि लिखत -*

| | | | | |
|---|---|---|---|---|
| .................. | + | .................. | - | ....................................। |
| .................. | + | .................. | - | ....................................। |
| .................. | + | .................. | - | ....................................। |
| .................. | + | .................. | - | ....................................। |
| .................. | + | .................. | - | ....................................। |

9. रेफस्य रेफे परे लोपः भवति। तत्पूर्वस्य ह्रस्वस्य दीर्घश्च सम्पद्यते।

(सूत्रम् - ढ्रलोपे पूर्वस्य दीर्घोऽणः।)

यथा - पुनः (र्) + रमते - पुना रमते।

मनुः (र्) + रम्यः - मनू रम्यः।

अन्तः (र्) + राष्ट्रम् - अन्ताराष्ट्रम्।

दाशरथिः (र्) + रामः - दाशरथी रामः।

स्वर् + राज्यम् - स्वाराज्यम्।

(स्वर् इति स्वर्गार्थकं रेफान्तमव्ययम्।)

**अभ्यासः ८**

*समानसन्धियुक्तानि पञ्चपदानि लिखत -*

| | | | | |
|---|---|---|---|---|
| .................. | + | .................. | - | ....................................। |
| .................. | + | .................. | - | ....................................। |
| .................. | + | .................. | - | ....................................। |
| .................. | + | .................. | - | ....................................। |
| .................. | + | .................. | - | ....................................। |

## ग. व्यञ्जनसन्धिः

द्वयोः व्यञ्जनवर्णयोः मेलनेन जायमानः वर्णविकारः एव व्यञ्जनसन्धिः भवति।

यथा - तत् + लयः - तल्लयः।

1. ञ म ङ ण न म एतान् विहाय पदान्ते वर्तमानाः व्यञ्जनवर्णाः स्वरेषु मृदुव्यञ्जनेषु च परेषु वर्गतृतीयत्वेन परिणमन्ते। क च ट त प एतेषु परेषु वर्गप्रथमवर्णत्वेन च परिणमन्ते।

(सूत्रम् - झलां जश् झशि, खरि च।)

यथा - मरुत् + अत्र - मरुदत्र।

तस्मात् + गतः - तस्माद्गतः।

वियत् + अङ्गणः - वियदङ्गणः।

तस्मात् + भीतः - तस्माद्भीतः।

मरुद् + पतिः - मरुत्पतिः।

तस्माद् + काकः - तस्मात्काकः।

**अभ्यासः १**

*समानसन्धियुक्तानि पञ्चपदानि लिखत -*

| | | | | |
|---|---|---|---|---|
| .................. | + | .................. | - | ....................................। |
| .................. | + | .................. | - | ....................................। |
| .................. | + | .................. | - | ....................................। |
| .................. | + | .................. | - | ....................................। |
| .................. | + | .................. | - | ....................................। |

2. पदान्ते वर्तमानाः व्यञ्जनवर्णाः वर्गपञ्चमेषु परेषु (ञ म ङ ण न म) स्ववर्गपञ्चमो वा भवति।

यथा - न्याय्याद् + मार्गाद् - न्याय्यान्मार्गाद्।

(सूत्रम् - यरोऽनुनासिकेऽनुनासिको वा।)

**अभ्यासः २**

*अधः प्रदत्तानि पदानि विश्लेषयत -*

| | | | | |
|---|---|---|---|---|
| त्वन्मते | - | .................. | + | ..................। |
| वाङ्मयम् | - | .................. | + | ..................। |
| अम्मयम् | - | .................. | + | ..................। |
| षण्मुखः | - | .................. | + | ..................। |
| तन्न | - | .................. | + | ..................। |
| दिङ्मुखम् | - | .................. | + | ..................। |

3. लकारे परे तवर्गस्य (त थ द ध न) लकारत्वं भवति।

यथा - तद् + लयः - तल्लयः।

(सूत्रम् - तोर्लि।)

**अभ्यासः ३**

*समानसन्धियुक्तानि पञ्चपदानि लिखत -*

.................. + .................. - ....................................।

.................. + .................. - ....................................।

.................. + .................. - ....................................।

.................. + .................. - ....................................।

.................. + .................. - ....................................।

4. सकारतवर्गयोः शकारचवर्गेषु परेषु शकारचवर्गत्वमापद्यते।

(सूत्रम् - स्तोः श्चुना श्चुः।)

यथा - तत् + छादयति - तच्छादयति।

निस् + शेषः - निश्शेषः।

**अभ्यासः ४**

*समानसन्धियुक्तपदानि लिखत -*

| पूर्वपदम् | उत्तरपदम् | सन्धियुक्तपदम् |
|---|---|---|
| शत्रून् | जयति | शत्रूञ्जयति |
| ..................... | ..................... | ..................... |
| ..................... | ..................... | ..................... |
| ..................... | ..................... | ..................... |
| ..................... | ..................... | ..................... |
| ..................... | ..................... | ..................... |

5. पदान्ते वर्तमानः नकारः छव् परे (छ ठ थ च ट त) अनुस्वारयुक्तसकारत्वं/शकारत्वमापद्यते।

(सूत्रम् - नश्छव्यप्रशान्।)

यथा - तान् + तान् - तांस्तान्।

**अभ्यासः ५**

*अधः प्रदत्तपदानां पदच्छेदं लिखत -*

| | | | | |
|---|---|---|---|---|
| बालांस्तान् | - | ................... | + | ...................। |
| कांश्चन | - | ................... | + | ...................। |
| देवांस्तान् | - | ................... | + | ...................। |
| भवांश्चिन्तयति | - | ................... | + | ...................। |
| पितॄंश्च | - | ................... | + | ...................। |

6. ह्रस्वात् परः नकारः ङकारः णकारः च स्वराक्षरेषु परेषु द्विगुणीभवति।

(सूत्रम् - ङमो ह्रस्वादचि ङमुण्नित्यम्।)

यथा - तस्मिन् अवसरे - तस्मिन्नवसरे।

सुगण् ईशः - सुगण्णीशः।

सन् अच्युतः - सन्नच्युतः।

**अभ्यासः ६**

*समानसन्धियुक्तानि पञ्चपदानि लिखत -*

| | | | | |
|---|---|---|---|---|
| ................... | + | ................... | - | ......................................। |
| ................... | + | ................... | - | ......................................। |
| ................... | + | ................... | - | ......................................। |
| ................... | + | ................... | - | ......................................। |
| ................... | + | ................... | - | ......................................। |

7. पदान्तस्य मकारस्य व्यञ्जनवर्णेषु परेषु अनुस्वारादेशः स्यात्।

(सूत्रम् - मोऽनुस्वारः।)

यथा - तम् + वन्दे - तं वन्दे।

शान्तम् + तं - शान्तं तं।

**अभ्यासः ७**

*समानसन्धियुक्तानि पञ्चपदानि लिखत -*

.................. + .................. - ....................................।
.................. + .................. - ....................................।
.................. + .................. - ....................................।
.................. + .................. - ....................................।
.................. + .................. - ....................................।

**अभ्यासः ८**

*प्रदत्तानि पदानि पट्टिकायां यथोचितं निवेशयत -*

स्वर्गस्योपरि, तथैवं, छायेव, गायंस्तिष्ठति, द्वाविमौ, प्रभात एव, सुतोऽभवत्, तल्लिखति, शम्भू राजते, रामश्च, सुचिरेणापि, खल्वत्र, को वा, शतान्यपि, तन्न, नास्त्युद्यमः, कोऽहम्, मुनिरुवाच, मरुच्छाया, मरुच्छाया, वाङ्मयम्, मरुल्लोलिता, नीरवः, नीरूपः, राजन्नयम्, तस्मिन्निति।

| क्रम संख्या | सन्धियुक्तपदम् | पूर्वपदम् | उत्तरपदम् | सन्धिः |
|---|---|---|---|---|
| उदाः | स्वर्गस्योपरि | स्वर्गस्य | उपरि | स्वरसन्धिः |
| | ...................... | ...................... | ...................... | ...................... |
| | ...................... | ...................... | ...................... | ...................... |
| | ...................... | ...................... | ...................... | ...................... |
| | ...................... | ...................... | ...................... | ...................... |

.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................
.................... .................... .................... ....................



# द्वितीयोऽध्यायः

## विशेषणविशेष्याणि।

गीता गीतं गायति। रमा नृत्यति। गणेशः पाठं पठति। महेशः नदीं गच्छति।

इमानि वाक्यानि युष्माभिः परिचितानि। एतेषु परिचितेषु वाक्येषु केवलं कर्ता, कर्म, क्रिया च एव भवन्ति। तदुपरि वाक्येषु विशेषणविशेष्याणि, विविधानि अव्ययानि च भवन्ति। विविधाः प्रयोगाः प्रयोगविशेषाः, अपि सन्ति। वाक्येषु 'क्तवत्वन्त', 'क्तान्त', 'तव्य', 'आनीय', 'य' प्रत्ययान्तानां प्रयोगाः च विद्यन्ते। सन्धिसमासादीनां प्रयोगपरिचयोऽपि आवश्यकः खलु?

सुन्दराः पुरुषाः गच्छन्ति। पण्डिता स्त्री आगच्छति। निबिडं वनं पश्यामि। इत्यादिषु वाक्येषु 'पुरुषाः', 'स्त्री', 'वन' मित्यादीनि विशेष्याणि भवन्ति। 'सुन्दराः', 'पण्डिता', 'निबिडम्' इत्यादीनां विशेषणमिति च नाम। विशेष्येषु विद्यमानं विशेषम् अथवा भेदं प्रदर्शयन्ति विशेषणानि।।

समर्थः बालः धावति, समर्थौ बालौ पठतः, समर्थाः बालाः गच्छन्ति, इत्यादिषु वाक्येषु विशेष्यमनुसृत्य विशेषणानामपि वचनानि परिवर्तन्ते। तथा विशेष्यमनुसृत्य विशेषणस्य लिङ्गमपि परिवर्तते।

यथा - अलसः सतीशः, अलसा सती, उचितं भाषणम्।

विशेषणविशेष्ययोः लिङ्गविभक्तिवचनानि समानानि भवन्ति।

उदा - सुन्दरं पुष्पं, निबिडात् वनात्, समर्थेषु बालकेषु।

नियतलिङ्गवचनानाम् उदाहरणम्

आपः - पकारान्तः स्त्रीलिंगः नित्यबहुवचनान्तः।
जलमित्यर्थः। (इमाः आपः शिवाः सन्तु)

दाराः - अकारान्तः पुल्लिङ्गः नित्यबहुवचनान्तः।
भार्या इत्यर्थः। (एते मे सुन्दराः दाराः)

> **"यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य।**
> **तल्लिङ्गं तद्वचनं सा च विभक्तिर्विशेषणस्यापि।।"**

| *उदा* | *एक* | *द्वि* | *बहु* (box) |
|---|---|---|---|
| ● प्रथमा (पु.) | वीरः पुरुषः | वीरौ पुरुषौ | वीराः पुरुषाः। |
| | വീരനായപുരുഷൻ | വീരന്മാരായ 2 പുരുഷന്മാർ | വീരന്മാരായ പുരുഷന്മാർ |
| द्वितीया | वीरं पुरुषं | वीरौ पुरुषौ | वीरान् पुरुषान्। |
| | വീരനായപുരുഷനെ | വീരന്മാരായ 2 പുരുഷന്മാരെ | വീരന്മാരായ പുരുഷന്മാരെ |
| ● प्रथमा (स्त्री) | धीरा वनिता | धीरे वनिते | धीराः वनिताः। |
| | ധീരയായ വനിത | ധീരകളായ 2 വനിതകൾ | ധീരകളായ വനിതകൾ |
| द्वितीया | धीरां वनितां | धीरे वनिते | धीराः वनिताः। |
| | ധീരയായ വനിതയെ | ധീരകളായ 2 വനിതകളെ | ധീരകളായ വനിതകളെ |
| ● प्रथमा (नपुं) | रम्यं वनं | रम्ये वने | रम्याणि वनानि। |
| | മനോഹരമായ കാട് | മനോഹരങ്ങളായ 2 കാടുകൾ | മനോഹരങ്ങളായ കാടുകൾ |
| द्वितीया | रम्यं वनं | रम्ये वने | रम्याणि वनानि। |
| | മനോഹരമായ കാടിനെ | മനോഹരങ്ങളായ 2കാടുകളെ | മനോഹരങ്ങളായ കാടുകളെ |

**अभ्यासाः - १**

- *कोष्ठे प्रदत्तस्य पदस्य उचितरूपेण रिक्तस्थानानि पूरयत -*

1. ................ बालः वनं गत्वा उच्चैः आक्रोशत्। (चपल)
2. सिंहः ................ सिंहीम् अवदत्। (प्रियतम)
3. सज्जनाः न्याय्येन ................ गच्छन्ति। (मार्ग)
4. बालः उन्नतात् ................ पतति। (वृक्ष)
5. अध्यापकः ................ बालाय पारितोषिकं ददाति। (समर्थ)
6. अस्य ................ प्रदेशस्य विषये ज्ञातुम् उत्सुकाः किम्? (सुन्दर)
7. तमिलुनाड् राज्ये ................ मनोहराणि मन्दिराणि वर्तन्ते। (अधिक)
8. विवेकानन्दः कन्याकुमार्यां ................ समुद्रस्थशिलायां स्थित्वा ध्यानमकरोत्। (रम्य)

9. पुरा केरलेषु ................ वनानि आसन्। (घोर)

10. अध्यापकः ................ कथाभिः शिष्यान् आह्लादयति। (मधुर)

- *कोष्ठे प्रदत्तस्य शब्दस्य उचितरूपेण रिक्तस्थानं पूरयत -*

1. ................ जनाः मन्दिरं गच्छन्ति। (भक्त)

2. विष्णुः ................ लोकान् रक्षति। (सर्व)

3. छात्राः सामान्येन दक्षिणेन ................ लिखन्ति। (कर)

4. महाभारतयुद्धे जिष्णुः ................ अस्त्रैः देवव्रतं प्राहरत्। (तीक्ष्ण)

5. द्विरेफाः विकसितेभ्यः ................ मकरन्दम् आस्वदन्ते। (पुष्प)

6. भवन्तः ................ जनानां साहाय्यम् आचरन्तु। (दुःखित)

7. ................ वनेषु सिंहा जीवन्ति। (निबिडः)

8. वृक्षाः ................ छायया ................ फलैः च जनान् सेवन्ते। (शीतल, मधुर)

9. ................ वर्षे ................ वर्षपातः समभवत्। (गत, महत्)

10. वयं ................ हस्तेन भोजनं कुर्मः। (वामेतर)

तत्कालविशेषणं, पूर्वकालविशेषणं (स्थिरविशेषणं), क्रियाविशेषणमिति विशेषणानां त्रैविध्यं वर्तते। अधः प्रदत्तानि वाक्यानि पठन्तु।

- सुन्दरः कृष्णः स्वयंवराय प्रातिष्ठत।
- दिनेशः हसन् विवाहाय प्रातिष्ठत।
- अश्वाः शीघ्रं धावन्ति।

अत्र प्रथमे वाक्ये विद्यमानः 'सुन्दर' शब्दः पूर्वकाल (स्थिरकाल) विशेषणं भवति। कुत इति चेत् कृष्णः प्रकृत्या एव सुन्दरः भवति, तस्मात्। द्वितीये वाक्ये तु दिनेशस्य हासः केवलं तात्कालिक एव। सः सदा न हसति। तस्मात् तत्कालविशेषणं भवति। तृतीये वाक्ये 'शीघ्रं' क्रियाविशेषणं भवति।

उच्चैः, नीचैः, सहसा, सद्यः प्रभृतीनि अव्ययानि क्रियाविशेषणत्वेन एव प्रयुज्जते। क्रियाविशेषणत्वेन उपयुज्यमानानि अन्यानि पदान्यपि अव्ययानि स्युः।

यथा - सस्नेहं, सादरं, सविनयं, सोत्साहमित्यादीनि।

उदा - रमेशः सकुतुकं गिरिम् अपश्यत्।

श्लोकानाम् अन्वयलेखनावसरे प्रायेण पूर्वकालविशेषणानि विशेष्यस्य पुरतः, तत्कालविशेषणानि विशेष्यस्य पश्चात् च लेखनीयानि।



*जायते प्रगतिर्नित्य-*
*मभ्यासं कुर्वतो ध्रुवम्।*
*मधूनि सञ्चितानि स्युः*
*कणशः मक्षिकाभिः किम्?*

# तृतीयोऽध्यायः

## क्तवत्वन्तं, क्तान्तम्

परस्मैपद - आत्मनेपदभेदं विना सर्वैः धातुभिः सह क्तवतु (तवत्) प्रत्ययं योजयित्वा, तत्कर्मकृतवत् इत्यर्थकं (कर्तरिभूते) क्रियानाम उत्पाद्यते। सेट् धातूनाम् इडागमः च स्यात्।

उदा - पठ् (सेट्)। पठ् + इ + तवत् - पठितवत्। (പഠിച്ച)

हृ (अनिट्)। हृ + तवत् - हृतवत्। (ഹരിച്ച)

- ऋकारान्त एकाच् धातून् हृ, कृ, स्मृ आदीन्, तथा वृङ्वृञौ च विहाय सर्वे धातवः अनिटः भवन्ति। परं तेषां लृट् लकारे इडागमः वर्तते।
- ऊ दृ द न्तै यौं ति रु क्ष्णु शीङ् स्नु नु क्षु श्वि डीङ् श्रिभिः।

वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः।।

ഒന്നിലധികം സ്വരമുള്ള എല്ലാ ധാതുക്കളും സേട്ടാകുന്നു. ഒരു സ്വരം മാത്രമുള്ളവയിൽ ऊ ॠ എന്നവസാനിക്കുന്നവ, यु, रु, क्ष्णु, शी, स्नु, नु, क्षु, श्वि, डी, श्रि, वृ, आ, वृ, उ ഇവ സേട്ടും മറ്റുള്ളവ അനിട്ടും ആകുന്നു. വ്യഞ്ജനത്തിൽ അവസാനിക്കുന്നവയിൽ താഴെപ്പറയുന്ന शक् മുതലായ 102 ധാതുക്കൾ മാത്രം അനിട്ടും ബാക്കിയെല്ലാം സേട്ടുമാകുന്നു.

शक्लृ पच् मुचि रिच् वच् विच् सिच् प्रच्छि, त्यज् निजिर् भजः।
भञ्ज् भुज् भ्रस्ज् मस्जि यज् युज् रुज् रञ्ज् विजिर् स्वञ्जि सञ्जसृजः।।

अद् क्षुद् खिद् छिद् तुदि नदः पद्य भिद् विद्यतिर् विनद्।
शद् सदी खिद्यतिः स्कन्दि हृदी क्रुध् क्षुधिबुध्यती।।

बन्धिर् युधिरुधी राधि व्यध् शुधः साधिसिध्यती।
मन्य हन् आप् क्षिप् छुपि तप्, तिपस् तृप्यतिदृप्यती।।

लिप् लुप् वप् शप् स्वप् सृपि यभ् रभ् लभ् गम् नम् यमो रमिः।
क्रुशिर् दंशि दिशी दृश् मृश् रिश् रुश् लिश् विश् स्पृशः कृषिः।।

त्विष् तुष् द्विष् दुष् पुष्य पिष् विष्, शिष् शुष् श्लिष्यतयो घसिः।
वसतिदेह् दिहि दुहा, नह् मिह् रुह् लिह् वहिस्तथा।
अनुदात्ता हलन्तेषु धातवो द्व्यधिकं शतम्।।

क्तवत्वन्तानां 'सुबन्तक्रिया' इति नामान्तरं विद्यते। अर्थात् क्तवत्वन्ताः पूर्णक्रियावत् प्रयोक्तुं शक्यन्ते। तत्र इदमपि ज्ञेयं क्तवत्वन्तानि नामविशेषणानि भवन्ति। तस्मात् विशेष्यस्य लिङ्ग-विभक्तिवचनान्येव क्तवत्वन्तानामपि। क्तवतूनां योगे धातुभिः सह गणचिह्नानि (विकिरणप्रत्ययः) नावश्यकानि। 'ई' वर्णयोजनेन क्तवत्वन्तस्य स्त्रीलिङ्गरूपं सिद्ध्यति।

उदा - चुर् - चोरयति - चोरितवान्, चोरितवती, चोरितम्।
कथ् - कथयति - कथितवान्, कथितवती, कथितम्।

**पठ् - पठितवान् पुल्लिङ्गम्**

| | | | | |
|---|---|---|---|---|
| प्रथमा | - | पठितवान् | पठितवन्तौ | पठितवन्तः। |
| द्वितीया | - | पठितवन्तं | पठितवन्तौ | पठितवतः। |
| तृतीया | - | पठितवता इत्यादि। | | |

**स्त्रीलिङ्गम्**

| | | | | |
|---|---|---|---|---|
| प्रथमा | - | पठितवती | पठितवत्यौ | पठितवत्यः। |
| द्वितीया | - | पठितवतीं | पठितवत्यौ | पठितवतीः। |
| तृतीया | - | पठितवत्या इत्यादि। | | |

**नपुंसकलिङ्गम्**

| | | | | |
|---|---|---|---|---|
| प्रथमा | - | पठितवत् | पठितवती | पठितवन्ति। |
| द्वितीया | - | पठितवत् | पठितवती | पठितवन्ति। |
| तृतीया | - | पठितवता इत्यादि। शिष्टं पुल्लिङ्गवत्। | | |

**अभ्यासाः - २**

- अधोदत्तेषु वाक्येषु लङ् क्रियापदानां स्थाने क्तवत्वन्तं योजयित्वा वाक्यं परिवर्तयत -

उदा - महेशः आपणम् अगच्छत्।

महेशः आपणं गतवान्।

1. दिव्या पाठान् अपठत्।

   ......................................................................

2. जनाः देवालयम् अगच्छन्।

   ......................................................................

3. पक्षिणः आकाशे अडयन्त।

   ......................................................................

4. शिष्याः गुरून् अवन्दन्त।

   ......................................................................

5. कृष्ण! त्वं कुतः पाठान् न अपठः?

   ......................................................................

6. हे बालाः, यूयं कुतः संस्कृतोत्सवाय न अगच्छत।

   ......................................................................

7. त्वं लेखान् अलिखः किम्?

   ......................................................................

8. यूयं सम्यक् अलिखत किम्?

   ......................................................................

9. अहं मातुलस्य गृहम् अगच्छम्।

   ......................................................................

10. वयं अध्यापकस्य उपदेशान् अन्वसराम। (अनु + सृ)

..........................................................................

## क्तान्तम्

धातुभिः सह कर्मार्थे भावार्थे च (कर्मणिप्रयोगे, भावेप्रयोगे) क्त (त) प्रत्ययं योजयित्वा भूतकालक्तान्तरूपाणि निष्पादयन्ति। इडागमव्यवस्था तु क्तवत्वन्तवदेव। क्तान्तान्यपि क्रियापदानि। अकारान्तत्वात् सिद्धरूपाणि बाल - लता - वन शब्दवत् भवन्ति।

अधोदत्तानि वाक्यानि पश्यन्तु -

- अनिता पाठान् अपठत्। लङ्।

  अनिता पाठान् पठितवती। क्तवत्वन्तम्।

- अनितया पाठाः अपठ्यन्त। कर्मणि लङ्।

  अनितया पाठाः पठिताः। क्तान्तम्।

- कालिदासः अभिज्ञानशाकुन्तलं नाटकं विरचितवान्।

  कालिदासेन अभिज्ञानशाकुन्तलं नाटकं व्यरच्यत - कर्मणि लङ् विरचितम्।

- भारविणा किरातार्जुनीयं महाकाव्यं रचितम्।

  भारविः किरातार्जुनीयं महाकाव्यं रचितवान्।

**प्रवर्तनम्।**

- कोष्ठे दत्तानां धातूनां क्तान्तरूपेण वाक्यानि परिवर्त्य लिखत -

  1. श्रीहर्षेण नागानन्दं व्यरच्यत। (वि + रच्)
  2. श्रीकृष्णेन कारागृहात् देवकी अमोच्यत। (मुच्)
  3. गुरुणा छात्राः उपादिश्यन्त। (उप + दिश्)
  4. वानरैः फलानि अक्षिप्यन्त। (क्षिप्)
  5. भीमेन पाञ्चाली अरक्ष्यत। (रक्ष्)

# चतुर्थोऽध्यायः

## तव्य - अनीय - य - प्रत्ययाः

धातुभिः सह 'तव्य', 'अनीय', 'य' प्रत्ययान् योजयित्वा भावार्थे कर्मार्थे च (भावे प्रयोगे, कर्मणिप्रयोगे) रूपाणि निष्पाद्यन्ते। अत्र परस्मैपद - आत्मनेपदभेदो नास्ति। 'तव्य' प्रत्यययोगे इडागमः स्यात्। प्रायेण कर्मणिभावे लिङ् इत्यस्य, अर्थबोधो जायते। एते प्रत्ययाः 'सुबन्तक्रिया' रूपेण प्रयोक्तुं शक्यन्ते। बाल, माला धनमित्यादि - अकारान्तवत् भवत्यस्य रूपाणि। एषां कर्तृपदं तृतीयायां षष्ठ्यां च स्यात्।

उदा - अस्माभिः / अस्माकम् ईश्वरः अर्चनीयः भवति।

अस्माभिः / अस्माकम् ईश्वरः अर्चितव्यः भवति।

अस्माभिः / अस्माकम् ईश्वरः अर्च्यः भवति।

നമ്മളാൽ / നമ്മൾക്ക് ഈശ്വരൻ ആരാധിയ്ക്കപ്പെടേണ്ടവനാകുന്നു.

तव / त्वया पूर्णवेदपुरी नाम नगरी गन्तव्या।

तव / त्वया अलकापुरी नाम नगरी गमनीया।

तव / त्वया मुम्बयी नाम नगरी गम्या।

तव अहं कथान्तरेषु स्मर्तव्यः।

त्वया वयं समये स्मरणीयाः।

त्वया अहं स्मर्यः।

अस्माभिः क्लिष्टाः पाठाः पठनीयाः।

युष्माभिः ललितानि काव्यानि पठितव्यानि।

अस्माकं सुन्दरकथाः पाठ्याः।

महाकविषु कालिदासः प्रथमगणनीयः।

**प्रवर्तनम्।**

- अधोदत्तानां धातूनां तव्य अनीय यप्रत्ययान्तानि त्रिषु लिङ्गेषु रूपाणि लिखत -

| | |
|---|---|
| कूज् अव्यक्ते शब्दे | കൂവുക |
| अर्ज अर्जने | സമ്പാദിയ്ക്കുക |
| गर्ज शब्दे | അലറുക |
| तर्ज भर्त्सने | ശകാരിയ്ക്കുക/ചീത്തപറയുക |
| व्रज गतौ | പോവുക |

*प्रयोगपटुता यस्य*
*तस्यैव प्रगतिर्भवेत्।*
*आहवे विक्रये चैव*
*विद्यादानेऽपि सर्वथा।।*



# पञ्चमोऽध्यायः

## शतृप्रत्ययः, शानच् प्रत्ययः च।

क्रियायाः निरन्तरतां सूचयितुम् एतत् प्रत्ययद्वयम् उपयुज्यते। क्रियायाः मूलं धातुः भवति। सः धातुः त्रिविधः। परस्मैपदी, आत्मनेपदी, उभयपदी च इति। अत्र पश्यतु -

धातुः

परस्मैपदी आत्मनेपदी उभयपदी

धातुना सह एतत् प्रत्ययद्वयम् उपयुज्यते। **शतृप्रत्ययः** परस्मैपदिधातुभ्यः प्रयुज्यमानः भवति।

यथा - पठ् + अत्

पठति - पठन् (पुल्लिङ्गे)

पठन्ती (स्त्रीलिङ्गे)

पठत् (नपुंसके)

**शानच्**

शानच् प्रत्ययः आत्मनेपदिधातुभ्यः प्रयुज्यते।

यथा - वन्दते - वन्दमानः

वन्दमाना

वन्दमानम् इति।

**शतृप्रत्ययः**

क्रियायाः निरन्तरतां सूचयति एषः प्रत्ययः इति पूर्वमेव उक्तम्। अर्थात् वर्तमानकालं सूचयति इति।

यथा - सतीशः पुस्तकं **पठन्** अस्ति।

सतीशस्य पठनक्रिया प्रचलति, न तु समाप्ता।

*केषाञ्चन धातूनां शतृप्रत्ययान्तं रूपं पश्यतु -*

| | धातु | पु. | स्त्री. | नपुं. |
|---|---|---|---|---|
| लिखति | लिख् | लिखन् | लिखती/लिखन्ती | लिखत् |
| वदति | वद् | वदन् | वदन्ती | वदत् |
| खादति | खाद् | खादन् | खादन्ती | खादत् |
| पिबति | पिब् | पिबन् | पिबन्ती | पिबत् |
| पतति | पत् | पतन् | पतन्ती | पतत् |
| पश्यति | (दृश, पश्य) | पश्यन् | पश्यन्ती | पश्यत् |
| उपविशति | उप विश् | उपविशन् | उपविशन्ती/ उपविशती | उपविशत् |
| चलति | चल् | चलन् | चलन्ती | चलत् |
| कूजति | कूज | कूजन् | कूजन्ती | कूजत् |

**स्वयमेव क्रियापदानां शतृप्रत्ययान्तं रूपं लिखतु -**

| | | (पु) | (स्त्री) | (नपुं) |
|---|---|---|---|---|
| 1. | वादयति | .......................... | .......................... | .......................... |
| 2. | हसति | .......................... | .......................... | .......................... |
| 3. | गायति | .......................... | .......................... | .......................... |
| 4. | नृत्यति | .......................... | .......................... | .......................... |
| 5. | गच्छति | .......................... | .......................... | .......................... |
| 6. | आगच्छति | .......................... | .......................... | .......................... |
| 7. | पृच्छति | .......................... | .......................... | .......................... |

8. कथयति ........................ ........................ ........................

9. पीडयति ........................ ........................ ........................

10. प्रेषयति ........................ ........................ ........................

***शतृप्रत्ययरूपं वाक्ये यथा -***

दिनेशः क्षीरं पिबति। दिनेशः गच्छति।

दिनेशः क्षीरं पिबन् गच्छति।

*स्वयं लिखित्वा अभ्यासं करोतु -*

1. अध्यापकः पाठं पाठयति। प्रश्नं पृच्छति।

..........................................................................................

2. बालिका गीतं गायति। ईश्वरं वन्दते।

..........................................................................................

- अधोदत्तानि वाक्यानि शतृप्रत्ययं प्रयुज्य संस्कृते परिवर्तयतु।

1. തുളസീധരൻ പഠിച്ചുകൊണ്ടിരിക്കുന്നു. (प्रथमा)
2. പുല്ല് തിന്നുന്ന മൃഗത്തെ കുട്ടി (ആൺ) നോക്കുന്നു. (द्वितीया)
3. നന്നായി പഠിക്കുന്ന ബാലനെകൊണ്ട് അധ്യാപകൻ കാര്യം ചെയ്യിക്കുന്നു. (तृतीया)
4. നൃത്തം ചെയ്യുന്ന ബാലികയ്ക്ക് പുരസ്കാരം നൽകുന്നു. (चतुर्थी)
5. ഓടുന്ന കുതിരയിൽനിന്ന് സതീശൻ വീഴുന്നു. (पञ्चमी)
6. വീഴുന്ന പഴത്തിന് ഹാനി സംഭവിക്കുന്നു. (षष्ठी)
7. ഒഴുകുന്ന നദിയിൽ ധാരാളം മീനുകൾ ഉണ്ട്. (सप्तमी)

- अधोदत्तानि वाक्यानि शानच् प्रत्ययं प्रयुज्य संस्कृते परिवर्तयतु।

1. ഭക്തൻ ദേവനെ വന്ദിച്ചുകൊണ്ടിരിക്കുന്നു. (प्रथमा)

2. കലോത്സവത്തിൽ മത്സരിക്കുന്ന കുട്ടിയെ പ്രശംസിയ്ക്കുന്നു. (द्वितीया)

3. വേദിയിൽ സംസാരിക്കുന്ന സതീശന്റെ കൂടെ ജനങ്ങളുണ്ട്. (तृतीया)

4. ഭക്ഷണം പാകം ചെയ്യുന്നവൾക്ക് വസ്തുക്കൾ നൽകുന്നു. (चतुर्थी)

5. ഇളകുന്ന കൊമ്പിൽ നിന്ന് പഴങ്ങൾ വീഴുന്നു. (पञ्चमी)

6. യാചിക്കുന്ന ഭിക്ഷകന്റെ കൈയിൽ പാത്രമുണ്ട്. (षष्ठी)

7. വർധിച്ചുകൊണ്ടിരിക്കുന്ന അധർമത്തിൽ എനിക്കു ദുഃഖമുണ്ട്. (सप्तमी)

सर्वेषु क्रियापदेषु एवं पूर्वोक्ता रूपसमानता नास्ति।

यथा - करोति कुर्वन् (पु)

कुर्वती (स्त्री)

कुर्वत् (नपुं)

पश्यतु...

शृणोति - श्रु - शृण्वन् - शृण्वती - शृण्वत्

शक्नोति - शक् - शक्नुवन् - शक्नुवती - शक्नुवत्

रोदिति - रुद् - रुदन् - रुदती - रुदत्

इदमपि जानातु......................

गच्छति - गच्छन्, पठति - पठन्, इति रूपाणि वयं दृष्टवन्तः। अत्र 'अन्' इति अन्तिमभागः दृश्यते। किन्तु 'ददाति' इति क्रियापदे शतृप्रत्ययरूपं किं भवेत्?

ददाति - ददत् इत्येव रूपम्।

**दशगणेषु, तृतीयगणे ये धातवः सन्ति तेषां शतृरूपेषु नकारस्य स्थाने तकारः एव भवति।**

| | | (पु) | (स्त्री) | (नपु) |
|---|---|---|---|---|
| ददाति | - | ददत् | ददती | ददत् |

एवमेव स्त्रीलिङ्गप्रयोगे 'पठति - पठन्ती' इतिवत् 'करोति - कुर्वन्ती' इति न भवति। 'कुर्वती' इत्येव शुद्धं रूपम्।

क्रियापदेषु 'ति' इत्यस्मात् पूर्वं ह्रस्वः अकारः भवति चेत् शतृरूपे स्त्रीलिङ्गे अन्ते 'न्ती' इति भवति। यदि 'ति' इत्यस्मात् पूर्वम् आ, इ, ई, उ, ओ इत्येते वर्णाः भवन्ति तर्हि 'ती' इत्येव रूपं सिद्ध्यति।

यथा - ल् + इ + ख् + **अ** + त् + इ

अत्र 'ति' तः - पूर्वं ह्रस्वः अकारः।

अतः लिखन्ती इति रूपं स्त्रीलिङ्गे।

लिखती इत्यपि शुद्धं रूपम्। (सूत्रम् - आच्छीनद्योर्नुम्, शप् श्यनोर्नित्यम्।)

किन्तु - द् + अ + द् + **आ** + त् + इ

अत्र आकारः वर्तते, अतः रूपं 'ददती' इति।

एतस्य प्रत्ययद्वयस्य योजनेन क्रिया नामरूपं प्राप्नोति।

**यथा - पठन् रामः**

अत्र 'पठन्' इति कथनेन एव कस्यचन पुरुषविशेषस्य स्वरूपं मनसि स्फुरति। एतस्य अपि सप्तविभक्तिषु रूपाणि भवन्ति। तदपि पश्यामः -

## तकारान्तः पुल्लिङ्गः 'पठत्' शब्दः

| ***विभक्तिः*** | ***ए.व*** | ***द्वि.व*** | ***ब.व*** |
|---|---|---|---|
| प्र | पठन् | पठन्तौ | पठन्तः |
| द्वि | पठन्तम् | पठन्तौ | पठतः |
| तृ | पठता | पठद्भ्याम् | पठद्भिः |
| च | पठते | पठद्भ्याम् | पठद्भ्यः |
| प | पठतः | पठद्भ्याम् | पठद्भ्यः |
| ष | पठतः | पठतोः | पठताम् |
| स | पठति | पठतोः | पठत्सु। |

## तकारान्तः स्त्रीलिङ्गः 'पठत्' शब्दः

| *विभक्तिः* | *ए.व* | *द्वि.व* | *ब.व* |
|---|---|---|---|
| प्र | पठन्ती | पठन्त्यौ | पठन्त्यः |
| द्वि | पठन्तीम् | पठन्त्यौ | पठतीः |
| तृ | पठन्त्या | पठन्तीभ्याम् | पठन्तीभिः |
| च | पठन्त्यै | पठन्तीभ्याम् | पठन्तीभ्यः |
| प | पठन्त्याः | पठन्तीभ्याम् | पठन्तीभ्यः |
| ष | पठन्त्याः | पठन्त्योः | पठन्तीनाम् |
| स | पठन्त्याम् | पठन्त्योः | पठन्तीषु। |

## तकारान्तः नपुंसकलिङ्गः 'पठत्' शब्दः

| ए.व. | द्वि.व. | ब.व |
|---|---|---|
| पठत् | पठती | पठन्ति |
| पठत् | पठती | पठन्ति |

शिष्टं पुल्लिङ्गशब्दवत् -

**अधोलिखितशब्दानां रूपाणि लिखतु -**

1. लिखन्

| | | |
|---|---|---|
| .................... | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |
| .................... | .................... | .................... |

2. लिखन्ती

.................... .................... ....................
.................... .................... ....................
.................... .................... ....................
.................... .................... ....................
.................... .................... ....................
.................... .................... ....................
.................... .................... ....................

3. लिखत्

.................... .................... ....................
.................... .................... ....................
.................... .................... ....................
.................... .................... ....................
.................... .................... ....................
.................... .................... ....................
.................... .................... ....................

4. गच्छन्

.................... .................... ....................
.................... .................... ....................
.................... .................... ....................
.................... .................... ....................
.................... .................... ....................
.................... .................... ....................
.................... .................... ....................

5. गच्छन्ती

.................... .................... ....................
.................... .................... ....................

.................... .................... ....................

.................... .................... ....................

.................... .................... ....................

.................... .................... ....................

.................... .................... ....................

6. गच्छत्

.................... .................... ....................

.................... .................... ....................

.................... .................... ....................

.................... .................... ....................

.................... .................... ....................

.................... .................... ....................

.................... .................... ....................

वाक्ये प्रयोगः कथम्? पश्यतु.....

प्र. गच्छन् रामः फलं खादति। (ए.व.)

द्वि. गच्छन्तं रामं माधवः आह्वयति। (ए. व.)

तृ. गच्छता रामेण सह अहं भाषणं करोमि।

गच्छता रामेण शब्दः क्रियते।

च. गच्छते रामाय पिता धनं ददाति।

प. गच्छतः रामात् भवान् किम् अभिलषति?

ष. गच्छतः रामस्य गृहं जानाति किम्?

स. गच्छति रामे मम विश्वासः वर्तते।

एवं द्विवचने बहुवचने च प्रयोगः करणीयः।

**स्त्रीलिङ्गे यथा -**

प्र. गायन्ती बालिका जनान् आकर्षति। (ए. व.)

द्वि. वदन्तीं महिलां सतीशः पश्यति।

तृ. नृत्यन्त्या लतया सह सर्वाः सख्यः सन्ति।

नृत्यन्त्या लतया पुरस्कारः प्राप्यते।

च. उपविशन्त्यै अम्बायै पुत्रः जलं ददाति।

प. पतन्त्याः लेखन्याः टोपिका स्खलति।

ष. चलन्त्याः शिक्षिकायाः अनुसरणं सर्वे कुर्वन्ति।

स. प्रवहन्त्यां नद्यां मीनाः वर्तन्ते।

अन्यवचनद्वये रूपाणि लिखित्वा परिशीलयतु -

**नपुंसकलिङ्गे यथा -**

प्र. मार्गे वाहनं गच्छत् अस्ति।

द्वि. चलत् व्यजनं मा स्पृश।

तृ. कथयता मित्रेण कार्यं सम्यक् कृतम्।

च. आहारं खादते शिशवे पानीयं ददातु।

प. शीघ्रं गच्छतः यानात् यात्रिकस्य भयं वर्तते।

ष. विकसतः पुष्पस्य सौन्दर्यं द्रष्टव्यम्।

स. तिष्ठति याने १०० जनाः उपविशन्ति।

अन्यवचनद्वयेऽपि एवं लिखित्वा परिशीलयतु -

**अभ्यासः**

- **कोष्ठकस्थशब्दानाम् उचितरूपैः रिक्तस्थानानि पूरयतु -**

1. सम्यक् ............. बालकैः पुरस्कारः प्राप्तः। (गायत्)
2. ............. जनेषु गोविन्दः सज्जनः। (गच्छत्)

3. कार्यं ............. सेवकाय वेतनं ददाति। (कुर्वत्)

4. ............. भक्तस्य नेत्रयोः अश्रूणि आगतानि। (प्रार्थयत्)

5. प्रकृतिं ............. छात्रः गृहं गच्छति। (पश्यत्)

## शानच् प्रत्ययः

एषः प्रत्ययः आत्मनेपदिधातूनाम् एव भवति इति पूर्वमेव उक्तम्। प्रत्यये 'आन' इति भागः अवशिष्यते। रूपाणि यथा -

| | | |
|---|---|---|
| वर्धते - वर्ध् (वृध्) + म + आन - | वर्धमानः | (पु) |
| | वर्धमाना | (स्त्री) |
| | वर्धमानम् | (नपु) |

| | | (पु) | (स्त्री) | (नपुं) |
|---|---|---|---|---|
| वन्दते | वन्द् - | वन्दमानः | वन्दमाना | वन्दमानम् |
| सेवते | सेव् - | सेवमानः | सेवमाना | सेवमानम् |
| कम्पते | कम्प् - | कम्पमानः | कम्पमाना | कम्पमानम् |

इदानीं स्वयं लिखित्वा परिशीलयतु -

1. प्रकाशते।

 ..........................................................

2. लज्जते।

 ..........................................................

3. प्रार्थयते।

 ..........................................................

4. शोभते।

 ..........................................................

5. मोदते।

 ..........................................................

6. बाधते।

..........................................................

7. पलायते।

..........................................................

8. प्रयतते।

..........................................................

9. सहते।

..........................................................

10. वर्तते।

..........................................................

वाक्येषु शानजन्तं रूपं पश्यतु -

1. शिशुः वर्धमानः वर्तते।
2. रोगी कटे शयानः अस्ति।

अत्र रूपद्वयमपि 'शानच्' प्रत्ययस्य एव। एकत्र 'मान' इति अपरत्र 'आन' इति च दृश्यते खलु? तत्कथम्?

धातोः शानजन्तं रूपं ज्ञातुम् एकः सरलः उपायः वर्तते। 'वर्धते' इत्यत्र अन्ते 'ते' इति वर्तते खलु? 'ते' इत्यतः पूर्वं कः वर्णः? यथा - वर्ध् + अ + ते। 'अ' इति खलु? एवं चेत् तादृशस्थानेषु 'मान' इति भवति। शास्त्रे तस्य 'मुक्' आगमः इत्युच्यते। तत्र 'म' अवशिष्यते।

वर्ध् + अ + म + आन - वर्धमान।

रोगी कटे शयानः 'अस्ति' इत्यत्र पश्यतु -

श् + ए + ते - शेते

अत्र 'ते' इत्यतः पूर्वं 'ए' कारः। अतः 'आन' इत्येव योजनीयम्। एवं 'शयानः' इति सिद्ध्यति।

यथा - अधीते - अधीयानः

कुरुते - कुर्वाणः

भुङ्क्ते - भुञ्जानः

चिनुते - चिन्वानः

क्रीणीते - क्रीणानः

- अधोदत्तानि उदाहरणानि परिशील्य वाक्यानां शानजन्तरूपाणि लिखतु।

भक्तः देवं वन्दते - भक्तः देवं वन्दमानः अस्ति। (प्रथमा)

1. बालः ग्रन्थम् अधीते। .......................................।
2. दीपः प्रकाशते। .......................................।
3. रमा सभाम् आगन्तुं लज्जते। .......................................।
4. अम्बा दुःखं सहते। .......................................।

बलिः वामनं वन्दते। तं वामनः अनुगृह्णाति।

वन्दमानं बलिं वामनः अनुगृह्णाति। (द्वितीया)

1. भिक्षुकः धनं याचते। तं दिनेशः पश्यति।
   ............................................................
2. शिष्यः गुरुं सेवते। तं गुरुः पालयति।
   ............................................................
3. लिपिकः सम्यक् कार्यं कुरुते। तं प्रबन्धकः अभिनन्दति।
   ............................................................

अम्बा भाषते। शिशुः क्रीडति।

भाषमाणया अम्बया सह शिशुः क्रीडति। (तृतीया)

1. पुत्रः क्रीडनकं दृष्ट्वा मोदते। रमा तेन सह उपविशति।
   ............................................................
2. पाचकः पचते। गोविन्दः तेन सह कार्यं करोति।
   ............................................................

छात्रः सुष्ठु यतते। शिक्षकः तस्मै प्रेरणां ददाति।

सुष्ठु यतमानाय छात्राय शिक्षकः प्रेरणां ददाति। (चतुर्थी)

1. शिशुः शय्यायां शेते। तस्मै माता दुग्धं दत्तवती।

    ..........................................................

2. गोपीकृष्णः सत्यं भाषते। तस्मै प्रधानाध्यापकः पुरस्कारम् अयच्छत्।

    ..........................................................

वृक्षः वातेन कम्पते। तस्मात् फलानि पतन्ति।

वातेन कम्पमानात् वृक्षात् फलानि पतन्ति। (पञ्चमी)

1. शुनकः पलायते। तस्मात् भयं न भवति।

    ..........................................................

2. सूर्यः प्रकाशते। तस्मात् किरणानि प्रसरन्ति।

    ..........................................................

बालः वेदिकायां भाषते। तस्य नाम मोहनः।

वेदिकायां भाषमाणस्य बालस्य नाम मोहनः। (षष्ठी)

1. छात्रः प्रयतते। तस्य विजयः सुनिश्चितः।

    ..........................................................

2. लीला पुस्तकात् अधीते। तस्याः लेखनी नष्टा भवति।

    ..........................................................

पूजकः देवं वन्दते। तस्मिन् भक्तिः अस्ति।

वन्दमाने पूजके भक्तिः अस्ति। (सप्तमी)

1. सुरेशः सर्वदा यतते। तस्मिन् सर्वेषां विश्वासो वर्तते।

    ..........................................................

2. वृक्षः कम्पते। तस्मिन् पक्षिणः न उपविशन्ति।

    ..........................................................

# षष्ठोऽध्यायः

## णिजन्तम् अथवा प्रयोजकणिजन्तम्

अ 1. सः कृष्णं पश्यति।

2. स तं कृष्णं दर्शयति।

आ 1. गोविन्दः ग्रामं गच्छति।

2. हरिः गोविन्दं ग्रामं गमयति।

इ 1. अहं पठामि।

2. अध्यापकः मां पाठयति।

उ 1. महेशः आस्ते।

2. रमेशः महेशम् आसयति/आसयते।

ऊ 1. भृत्यः पचति।

2. गणेशः भृत्येन पाचयति।

पूर्वोक्तानि वाक्यानि पठन्तु। तत्र प्रथमे वाक्ये कर्ता स्वयमेव कर्म करोति। द्वितीये वाक्ये कर्मकरणाय प्रेरणा वर्तते। तस्मात् द्वितीयवाक्यानि प्रेरणार्थकणिजन्तानि भवन्ति।।

സ്വതവെ സംഭവിയ്ക്കുന്ന ക്രിയകളെ കേവലക്രിയകൾ എന്നും വേറൊരാളുടെ പ്രേരണയാൽ സംഭവിയ്ക്കുന്ന ക്രിയകളെ പ്രയോജകക്രിയ (ണിജന്തം) എന്നു പറയുന്നു.

| उद - | | केवलं | | प्रयोजकम्। |
|---|---|---|---|---|
| 1. | പഠിയ്ക്കുന്നു | पठति | പഠിപ്പിയ്ക്കുന്നു | पाठयति। |
| 2. | ഉറങ്ങുന്നു | स्वपिति | ഉറക്കുന്നു | स्वापयति। |
| 3. | കുടിയ്ക്കുന്നു | पिबति | കുടിപ്പിയ്ക്കുന്നു | पाययति। |
| 4. | ഉണ്ണുന്നു | भुनक्ति | ഊട്ടുന്നു | भोजयति। |

- प्रेरणार्थक (णिजन्तानि) क्रियापदानि दशमगणीयक्रियापदवत् भवन्ति।
- णिजन्तक्रियारूपाणि प्रायः परस्मैपदे तथा आत्मनेपदे च भवन्ति।

उद - सः पाठयति, पाठयते वा।

- अकर्मकधातवः णिजन्ते सकर्मकाः भवेयुः।

‘महेशः अस्ते’ इत्यत्र आस् धातुः अकर्मकः भवति। ‘रमेशः महेशम् आसयते’ इति णिजन्ते सकर्मकः भवति। आस्ते इति क्रियायाः कर्ता ‘महेशः’ णिजन्ते कर्म (महेशं) भवति। अतः केवलक्रियायाः कर्ता प्रयोजके कर्म स्यात्।

- सकर्मकधातवः प्रायेण णिजन्ते द्विकर्मकक्रियाः भवन्ति।

‘सः कृष्णं पश्यति’ इति वाक्ये ‘पश्यति’ सकर्मकक्रिया भवति। कर्म तु राममिति। णिजन्ते ‘स तं कृष्णं दर्शयति’ इति। अत्र कर्मद्वयं वर्तते तं, कृष्णं च।

- केवलक्रियायाः कर्ता प्रयोज्यकर्ता इति, णिजन्तक्रियायाः कर्ता प्रयोजककर्ता इति च व्यपदिश्यते।

- धातुभिः सह ‘णिच्’ प्रत्ययं योजयित्वा णिजन्ताः निष्पाद्यन्ते। (णिचि - ‘ण’ कारस्य ‘च’ कारस्य च लोपः, ‘इ’ अवशिष्यते, स ‘अय्’ इति स्यात्।)

णिचः योगे अजन्तधातोः अन्तिमस्वरस्य तथा अन्तिमवर्णात् पूर्वस्य अकारस्य च वृद्धिः भवति। (वृद्धि - आ, ऐ, औ।)

लघूपधायाः गुणश्च भवति। (गुणः - अ, ए, ओ।) तथा ऐ - आय् इति औ - आव् इति च स्यात्।

| | | | | |
|---|---|---|---|---|
| उदा - | भू | ആവുക | भावय | ആക്കുക |
| | पठ् | പഠിയ്ക്കുക | पाठय | പഠിപ്പിയ്ക്കുക |
| | लिख् | എഴുതുക | लेखय | എഴുതിയ്ക്കുക |

उपधा - अलोऽन्त्यात् पूर्व उपधा।

अन्त्यवर्णस्य पूर्वः वर्णः भवति उपधा।

ശബ്ദത്തിന്റെ അന്ത്യവർണ്ണത്തിന് തൊട്ടുമുമ്പു വരുന്ന വർണ്ണമാകുന്നു ഉപധ.

| | | | | |
|---|---|---|---|---|
| उदा - | पच् | इति शब्दे उपधा | - | अ। |
| | धरा | इति शब्दे उपधा | - | र्। |
| | वृध् | इति शब्दे उपधा | - | ऋ। |
| | भगवान् | इति शब्दे उपधा | - | आ। |

- धातु + इ (णिच्) + अ (शप्) - णिजन्तम्

उदा - केवलधातु - कृ ചെയ്യുക

कृ + णिच् + शप्

कार् + इ + अ - कारि + अ (गुण्यम्)

कारे + अ - कारय (अयादेशः)

परस्मैपदि - कारयति। അവൻ ചെയ്യിയ്ക്കുന്നു

आत्मनेपदि - कारयते। അവൻ ചെയ്യിയ്ക്കുന്നു

एवम्

| | | | | |
|---|---|---|---|---|
| भू | - | भावय | भावयति | भावयते। |
| विद् | - | वेदय | वेदयति | वेदयते। |
| वद् | - | वादय | वादयति | वादयते। |
| भुज् | - | भोजय | भोजयति | भोजयते। |

- गम्, चम्, शम्, घर्, प्रथ्, जन्, त्वर्, व्यथ् प्रभृतीनां धातूनाम् उपान्त्यस्य अकारस्य वृद्धिः न भवेयुः।

उदा - गम् - गमयति गमयते।

चम् - चमयति चमयते।

- 'आ' कारान्तधातुषु णिच् (इ) प्रत्ययात् पूर्वं 'प' कारः आगच्छति।

उदा -

| | | | |
|---|---|---|---|
| स्था | നില്ക്കുക | स्थापयति | स्थापयते। |
| मा | അളക്കുക | मापयति | मापयते। |
| गा | പാടുക | गापयति | गापयते। |
| दा | കൊടുക്കുക | दापयति | दापयते। |
| भा | ശോഭിയ്ക്കുക | भापयति | भापयते। |

- दे, धो, दो, शै, धै धातूनामपि 'प' कारः आगच्छति।

| | | | | |
|---|---|---|---|---|
| उदा - | दे | സംരക്ഷിയ്ക്കുക | दापयति | दापयते। |
| | दो | മുറിയ്ക്കുക | दापयति | दापयते। |
| | ध्यै | ധ്യാനിയ്ക്കുക | ध्यापयति | ध्यापयते। |

- 'ज्ञा', 'स्ना', धातोः रूपद्वयं वर्तते।

| | | | |
|---|---|---|---|
| ज्ञा | അറിയുക | ज्ञापयति | ज्ञापयते। |
| | | ज्ञपयति | ज्ञपयते। |
| स्ना | കുളിയ്ക്കുക | स्नापयति | स्नापयते। |
| | | स्नपयति | स्नपयते। |

- 'पा' धातोः रक्षणार्थे पालयति पालयते।

  पिबत्यर्थे पाययति पाययते।

- शो (മൂർച്ചകൂട്ടുക) छो (മുറിയ്ക്കുക) सो (നശിപ്പിയ്ക്കുക) व्ये (മൂടുക) वे (നെയ്യുക) सै (ക്ഷയിയ്ക്കുക) ह्वे (വിളിയ്ക്കുക) एषु धातुषु 'प' कारस्य स्थाने 'य' कारः आगच्छति।

| | | |
|---|---|---|
| शो | शाययति | शाययते। |
| सो | साययति | साययते। |
| वे | वाययति | वाययते। |
| ह्वे | ह्वाययति | ह्वाययते। |

## प्रवर्तनानि

अधो लिखितानां धातूनां णिजन्तरूपाणि पठत -

| | | | |
|---|---|---|---|
| इण् | (പോവുക) | गमयति | ते। |
| क्री | (വാങ്ങുക) | क्रापयति | ते। |
| जि | (ജയിയ്ക്കുക) | जापयति | ते। |
| दुष् | (ദുഷിയ്ക്കുക) | दूषयति | ते। |

| | | | |
|---|---|---|---|
| प्री | (ഇഷ്ടപ്പെടുക) | प्रीणयति /प्राययति | ते। |
| रभ् | (ആരംഭിയ്ക്കുക) | रम्भयति | ते। |
| रुह् | (വളരുക, കയറുക) | रोहयति/रोपयति | ते। |
| सिध् | (നിർവഹിയ്ക്കുക) | साधयति | ते। |
| हन् | (കൊല്ലുക) | घातयति | ते। |
| ह्री | (ലജ്ജിയ്ക്കുക) | ह्रेपयति | ते। |

- अधोलिखितानि वाक्यानि कैरल्यां अनुवदत।

1. पुष्यमित्रो भजते याजकास्तं याजयन्ति।
2. कृष्णवर्मा पुत्रेण प्रत्यहं शतं गा दापयन्ति।
3. नगेन्द्रसक्तां दृष्टिं पार्श्वे कस्यापि क्रन्द्रितमाकर्ण्य राजा न्यवर्तयत्।
4. ग्रीष्मकाले घर्मोङ्गानि ग्लपयति, स्वेदं प्रवर्तयति, तृष्णां च परिवर्धयति।
5. असुरस्य प्रचण्डेन तपसा प्रसन्नो भगवान् शङ्करः स्वीयं रूपं तमदर्शयत्।
6. गिरीशः बलीवर्दैः सस्यं भक्षयति।
7. गृहे शत्रुणा पातितमग्निं सुरेशः निरवापयत्।
8. सांसारिका भावा मनो रमयन्ति।
9. जानकीं रथमारोप्य जाह्नवीतीरमासाद्य रामऽज्ञापितो लक्ष्मणः तां विजहौ।

- अधो लिखितेषु वाक्येषु क्रियापदानि णिजन्तत्वेन परिवर्त्य लिखत।

1. कविः काव्यं लिखति। राजा .................................।
2. बालः स्वपिति। माता .................................।
3. दीपः ज्वलति। अहं .................................।
4. वृक्षस्य शाखाः चलन्ति। वानरः .................................।
5. गजः क्षेत्राङ्कणं प्राविशत्। आधोरणः .................................।

6. जनाः हसन्ति। विदूषकः ................................।

7. रोगी औषधं पिबति। वैद्यः ................................।

8. भृत्यः कर्म करोति। भूस्वामी ................................।

9. गावः पथि तिष्ठन्ति। गोस्वामी ................................।

10. दरिद्रः धनं यच्छति। धनिकः ................................।

- णिजन्तः कश्चन व्युत्पन्नधातुः भवति। अतः तैः सह सर्वे लकाराः, शतृ, शानच्, क्तवतु, क्त, तव्य, आनीय, तुमुन्, क्त्वा, ल्यप्, आदि प्रत्ययाः योजयन्ति। कर्मणिभावेप्रत्ययस्य 'यक्' इत्यस्य योगे 'णिचः' लोपः स्यात्।

| | | | | | |
|---|---|---|---|---|---|
| उदा - | पाठयति | | - | कर्मणि | पाठ्यते। |
| | रक्षयति | रक्षति | - | कर्मणि | रक्ष्यते |

*न पटुता पटुता यस्य*
*भाषाज्ञानविवर्जिता।*
*चन्द्रमा शोभते नैव*
*मेघच्छन्ना नभस्थले।।*

# सप्तमोऽध्यायः

## कारकम्

वाक्ये क्रियया सह यत् अन्वेति (सम्बन्धं प्राप्नोति) तत् कारकम्। वाक्ये नामपदानां क्रियया सह यः सम्बन्धः वर्तते तत्कारकमित्युच्यते। वस्तुतः क्रियायाः आकांक्षापूरकं भवति कारकम्। सप्तविभक्तिषु षष्ठीं विहाय इतरे क्रियया सह अन्वयं कृत्वा वाक्यस्य आकांक्षांपूरयति। अतः षट् कारकाणि सन्ति। तानि च

| | | | |
|---|---|---|---|
| कर्तृकारकम् | - | प्रथमा विभक्तिः | रामः |
| कर्मकारकम् | - | द्वितीया विभक्तिः | रामं |
| करणकारकम् | - | तृतीया विभक्तिः | रामेण |
| सम्प्रदानकारकम् | - | चतुर्थीविभक्तिः | रामस्य |
| अपादानकारकम् | - | पञ्चमीविभक्तिः | रामात् |
| अधिकरणकारकम् | - | सप्तमीविभक्तिः | रामे |

षष्ठी विभक्तिस्तु द्वयोः नामपदयोः सम्बन्धं प्रकाशयते। यथा 'दशरथस्य पुत्रः'। अत्र 'दशरथ', 'पुत्र' शब्दयोः मिथः जन्यजनकभावः उक्तः।

വാക്യത്തിൽ നാമത്തിന് ക്രിയയോടുള്ള ബന്ധത്തിന് കാരകമെന്നാണല്ലോ പേര്. ക്രിയയുണ്ടാക്കുന്ന ആകാംക്ഷയെ പൂരിപ്പിയ്ക്കുന്നതാണ് **കാരകം**. പ്രഥമാ തുടങ്ങി സപ്തമിവരെയുള്ള ഏഴു വിഭക്തികളിൽ ഷഷ്ഠിവിഭക്തിയൊഴികെ മറ്റെല്ലാ വിഭക്തികളും ക്രിയയോടന്വയിച്ച് ആകാംക്ഷയെ പൂരിപ്പിക്കുന്നു. അതുകൊണ്ട് കാരകങ്ങൾ ആറ്. ഇവയ്ക്ക് യഥാക്രമം കർത്തൃകാരകം, കർമ്മകാരകം, കരണകാരകം, സംപ്രദാനകാരകം, അപാദാനകാരകം, അധികരണകാരകം എന്നിങ്ങനെയാണ് പേരുകൾ.

- **കാരകവിഭക്തി**

  കർത്തൃകർമാദികളായ കാരകാർത്ഥത്തെ കുറിക്കുന്നു.കാരകത്തിന് കാരണമായ വിഭക്തിക്ക് കാരകവിഭക്തി എന്നു നാമം. സംപ്രദാനകാരകത്തിലുള്ള കാരകവിഭക്തി ചതുർത്ഥിയും അപാദാനകാരകത്തിലുള്ള കാരകവിഭക്തി പഞ്ചമിയുമാകുന്നു.

- **ഉപപദവിഭക്തി**

  ക്രിയകൾ മാത്രമല്ല, ചില അവ്യയങ്ങളും ആകാംക്ഷാപൂർത്തിക്ക് വിഭക്തികളോടന്വയിക്കാറുണ്ട്. ഈ വിഭക്തികൾക്ക് ഉപപദവിഭക്തികൾ എന്നു പറയുന്നു. അടുത്തു ഉച്ചരിക്കുന്ന പദങ്ങളെ (ഉപപദങ്ങളെ) ആശ്രയിച്ചുവരുന്ന വിഭക്തികൾ ഉപപദവിഭ

ക്തികളാണ്.

उदा - नमस् - नमश्शिवाय। ശിവനു നമസ്കാരം

उत्तरं - ग्रामादुत्तरम्। ഗ്രാമത്തിനു വടക്ക്

- കാരകവിഭക്തിയും ഉപപദവിഭക്തിയും ഒന്നിച്ച് പ്രയോഗിക്കേണ്ടിവരുന്നിടത്ത് കാരകവിഭക്തിയ്ക്കാണ് പ്രാധാന്യം.

अन्तरा, अन्तरेण (विना मध्येव)

अनयोर्योगेद्वितीया। नरो विद्यामन्तरा पशुः।

विनेत्यर्थः अङ्गनामङ्गनामन्तरा माधवः। രണ്ടു യുവതികളുടെ മധ്യത്തിൽ മാധവൻ എന്നർത്ഥം.

उपपदविभक्तेः कारकविभक्तिर्बलीयसी।

उदा - गुरुं नमस्कृत्य।

गुरवे नमस्कृत्य എന്നല്ല. ഇവിടെ नमस् ശബ്ദം പ്രയോഗിക്കുമ്പോൾ ചതുർത്ഥീവിഭക്തി വേണമെങ്കിലും, 'कृ' ധാതുവിന്റെ കാരകമായ ദ്വിതീയാവിഭക്തി പ്രയോഗിച്ചിരിക്കുന്നു.

## प्रथमा विभक्तिः (कर्तृकारकम्)

कर्तरि नाममात्रे च कर्मवाक्यस्य कर्मणि।

सम्बोधनेऽव्यये चापि प्रथमा बुधसम्मता।।

### कर्तरिप्रयेगोषु कर्ता

कर्तृशब्दस्य सप्तमीविभक्तौ रूपं भवति 'कर्तरि' इति। कर्तरि प्रयोगेषु कर्तृवाचकपदं प्रथमाविभक्तौ प्रयुज्यते। प्रथमाविभक्तौ प्रयुक्तं पदं प्रधानं भवति। कर्तरिप्रयोगेषु कर्तृपदस्य एव प्राधान्यं कल्पितम्।

यथा - रामः ग्रामं गच्छति।

अत्र रामः कर्ता। वाक्ये चास्मिन् कर्तृपदस्य प्राधान्यात् कर्तरिप्रयोगः। कर्तरिप्रयोगेषु कर्तृपदं प्रथमायां प्रयुज्यते।

'गच्छति' इति क्रियायाः चत्वारः अर्थाः विद्यन्ते। गम् इति धातोः संयोगरूपं फलं, तदनुकूलव्यापारः चेति अर्थद्वयम्। 'ति' इति तिङ् प्रत्ययस्य तु कर्तृसंख्या, वर्तमानकालश्चेति

अर्थद्वयम्। गमनानुकूलव्यापारवान् भवति कर्ता। ग्रामसंयोगरूपात्मकं फलं कर्मणि च वर्तते।

- कोष्ठके प्रदत्तस्य पदस्य उचितरूपेण वाक्यं पूरयत।

1. ................ देवालयं गच्छन्ति। (महिला)
2. ................ वृक्षेषु वसन्ति। (वानरः)
3. ................ विद्यालयं गच्छतः। (सः)
4. ................ कुत्र गच्छथ? (त्वम्)
5. ................ आपणं गच्छामि। (अहं)

**नाममात्रे च**

प्रातिपदिकार्थे लिङ्गार्थे परिमाणार्थे वचनार्थे च प्रथमाविभक्तिः प्रयुज्यते।

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा।

**क. प्रातिपदिकार्थे**

पदं पदं प्रति - प्रतिपदम्। प्रतिपदं भवं - प्रातिपदिकम्। यत्पदेन यदुच्यते तदेव तत्पदस्यार्थः।

उदा - रामः, गोविन्दः, कमलं, राधा..........।

**ख. लिङ्गार्थे**

लिङ्गस्य (पुल्लिङ्ग - स्त्रीलिङ्ग - नपुंसकलिङ्गः) सूचनार्थं प्रथमा कार्या।

उदा - समर्थः (पुल्लिङ्गः)

समर्था (स्त्रीलिङ्गः)

समर्थं (नपुंसकलिङ्गः)

**ग. परिमाणार्थे**

परिमाणस्य अर्थे च प्रथमा योज्या।

उदा - त्रीणि रूप्यकाणि।

एकचषकं क्षीरम्।

द्रोणो व्रीहिः

## घ. वचनार्थे

एकत्व, द्वित्व, बहुवचनत्व, प्रकाशनाय च प्रथमाविभक्तिः प्रयुज्यते।

उदा - वानरः (एकः वानरः)

वानरौ (द्वौ वानरौ)

वानराः (बहवः वानराः)

- प्रदत्तेषु वाक्येषु कर्तृपदस्य अधः रेखां कृत्वा तस्य लिङ्गवचने लिखत।

उदा - बालौ क्रीडाङ्गणं गच्छतः। ...पुल्लिङ्गः.. .....द्विचनम्.....

1. मार्जाराः मूषकान् खादन्ति। ................ ................
2. विमला देवालयं प्रविशति। ................ ................
3. छात्राः संस्कृतं पठन्ति। ................ ................

## कर्मवाक्यस्य कर्मणि

कर्मशब्दस्य प्राधान्यभूतेषु वाक्येषु कर्मशब्दे प्रथमाविभक्तिः प्रयुज्यते। यत्र प्राधान्यं विवक्षितं तत्र प्रथमाविभक्तिप्रयोगः इति फलितार्थः।

'राधया विद्यालयः गम्यते' इत्यत्र विद्यालयस्य एव प्राधान्यं विवक्षितम्। अतः कर्मभूतस्य विद्यालयशब्दे प्रथमाविभक्तिः।

- अधः प्रदत्तेषु वाक्येषु कर्तुः वा कर्मणः वा प्राधान्यम् इति विविच्य लिखत।

1. याचकः भिक्षां याचते। ..................................
2. कुक्कुटाः जनैः पोष्यन्ते। ..................................
3. शुकाः फलानि खादन्ति। ..................................
4. भक्तैः हरिः सेव्यते। ..................................
5. राज्ञा प्रजाः पाल्यन्ते। ..................................
6. सत्यमेव जयते। ..................................

7. खगाः आकाशे डयन्ते। ..................................

8. सूर्येण पङ्कजानि विकास्यन्ते। ..................................

## सम्बोधने

अभिमुखीकृत्य बोधनं सम्बोधनम्। सम्बोधनेषु प्रथमाविभक्तिः प्रयोज्या।

| | | | | | |
|---|---|---|---|---|---|
| उदा - | रामः | - | हे राम | हे रामौ | हे रामाः |
| | राधा | - | हे राधे | हे राधे | हे राधाः |
| | मित्रं | - | हे मित्र | हे मित्रे | हे मित्राणि |
| | माता | - | हे मातः | हे मातरौ | हे मातरः |
| | पिता | - | हे पितः | हे पितरौ | हे पितरः |
| | हरिः | - | हे हरे | हे हरी | हे हरयः |
| | नदी | - | हे नदि | हे नद्यौ | हे नद्यः |
| | भूः (भूमिः) | - | हे भूः | हे भुवौ | हे भुवः |
| | सरस्वती | - | हे सरस्वति | हे सरस्वत्यौ | हे सरस्वत्यः |
| | श्रीः | - | हे श्रीः | हे श्रियौ | हे श्रियः |
| | गुरुः | - | हे गुरो | हे गुरू | हे गुरवः |
| | सेनानीः | - | हे सेनानीः | हे सेनान्यौ | हे सेनान्यः। |

- अधः प्रदत्तानां शब्दानां सम्बोधनप्रथमारूपाणि लिखत।

| | | | | |
|---|---|---|---|---|
| बालः | - | ................ | ............... | ............... |
| लता | - | ................ | ............... | ............... |
| भ्राता | - | ................ | ............... | ............... |
| मुनिः | - | ................ | ............... | ............... |
| जननी | - | ................ | ............... | ............... |

## अव्यये च

कुत्रचित् अव्ययशब्देषु परेषु पूर्वपदस्य प्रथमाविभक्तिः।

उदा - 'रामः' इति।

'रामः' नाम।

'राम' एवेतिसंज्ञा।

रावणो नाम राक्षसः।

- अधः प्रदत्तेषु वाक्येषु प्रथमाविभक्त्यन्तपदानि चित्वा लिखतु। किमव्ययं परम् इति च सूचयतु।

1. अश्वत्थस्य 'केशवालयः' इति प्रथाऽस्ति।
2. जनै सः 'मूर्घः' इति सम्बुध्यते।
3. अपाणिनीयम् 'असाधुः' इति प्रथा।
4. राजा चन्द्रः इव शोभते।
5. 'किं सञ्जातम्' इति तमपृच्छत्।
6. सिंहः 'पञ्चास्यः' इति उच्यते।
7. दधीचिमुनेः 'वृत्रहा' इति नाम अजायत।
8. बालः भीतः इव अलक्ष्यत।
9. श्यामफलके 'वृक्षः' इति लिखत।

## द्वितीया विभक्तिः (कर्मकारकम्)

कालाध्वनोः कर्मयोगे क्रियायाश्चविशेषणे

ऋते विनान्तरेणैषु परितः सर्वतोऽनु च।

अधिपूर्वकशीङ्स्थासामन्तरा समयाऽथ धिक्

अनुपूर्वे वस् धातोः अनुपूर्वके विशि।

द्विकर्मकधातूनामनुक्ते सति कर्मणि
द्वितीया प्रोच्यते सद्भिः प्रधाने चापि कर्मणि।।

## प्रधाने कर्मणि

कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्म भवति। सर्वासां क्रियाणां किञ्चित् फलं जायते। तच्च फलं येन सम्बद्धं भवति तत् कर्म भवति।

कर्तुरीप्सिततमं कर्म।।

यथा - 'माता तण्डुलं पचति' इत्यत्र पच् धातोः फलं विक्लित्तिरूपं (अवयवशैथिल्यं) भवति। तत् फलं तण्डुलेन एव सम्बन्धं भवति। अतः तत् कर्म। 'कर्मणि द्वितीया' इति नियमेन। 'ओदनम्' इति द्वितीया विभक्तिश्च।

- अधः प्रदत्तवाक्येषु कर्म विवेचयत।

1. रामः रावणम् अमारयत्। ..................................
2. शुकः जम्बूफलं खादति। ..................................
3. गुरुः शिष्यं प्रशंसति। ..................................
4. भक्तः ईश्वरं वन्दते। ..................................
5. कर्षकः गां बध्नाति। ..................................

- कोष्ठके दत्तस्य पदस्य उचितविभक्तिरूपेण रिक्तांशान् पूरयत।

1. बालिका .................... पोषयति। (खगः)
2. अहं .................... नमामि। (गुरुः)
3. अजपालः .................... चारयति। (अजः)
4. रविकुमारः .................... अपठत्। (पाठः)
5. छात्राः .................... अगच्छन्। (पाठशाला)
6. रक्षिपुरुषः .................... गृह्णाति। (चोरः)
7. वयं .................... खादामः। (अपूपः)

8. वयं .................... पश्यामः। (चलचित्रं)

9. वनिता .................... धरति। (अङ्गुलीयं)

10. जनाः .................... तरन्ति। (नदी)

## द्विकर्मकधातूनाम् अनुक्ते कर्मणि

द्वे कर्मणी यस्य सः द्विकर्मकः। द्विकर्मकेषु धातुषु अनुक्ते (अप्रधाने) कर्मणि द्वितीया विभक्तिः प्रयुज्यते। (दुह्, याच्, पच्, दण्ड्, रुधि, प्रच्छि - चि, ब्रू, शासु, जि, मथ्, मुष्, नी, हृ, कृष्, वह्, एते, दुहादयः, धातवः)

उदा - माता अजां दोग्धि पयः। अस्मिन् वाक्ये अजां, पयः इति कर्मद्वयं वर्तते। तत्र कर्तुः आप्तुम् इष्टतमं कारकं प्रधानकर्म एव।

मातुः आप्तुम् इष्टतमं भवति पयः। अतः पयः प्रधानकर्म। अजाम् इति अप्रधानकर्म।

- अधः प्रदत्तवाक्येषु प्रधानकर्म अनुक्तकर्म च विवेचयत।

| | | *प्रधानकर्म* | *अनुक्तकर्म* |
|---|---|---|---|
| 1. | लीला गां पयः दोग्धि। | ..................... | ..................... |
| 2. | भिक्षुकः मातरं भिक्षां याचते। | ..................... | ..................... |
| 3. | चोरः रक्षिपुरुषं दयां याचते। | ..................... | ..................... |
| 4. | पाचकः गोधूमान् पायसं पचति। | ..................... | ..................... |
| 5. | राजा अपराधिनं काराग्रहवासं दण्डयति | ..................... | ..................... |
| 6. | गोपालः गां व्रजम् अवरुणद्धि। | ..................... | ..................... |
| 7. | बालिकाः मन्दारम् अवचिन्वन्ति पुष्पाणि। | ..................... | ..................... |
| 8. | आचार्यः छात्रान् वेदशास्त्रं ब्रूते। | ..................... | ..................... |
| 9. | देवाः क्षीरनिधिं सुधां मथ्नाति। | ..................... | ..................... |
| 10. | पाण्डवाः कौरवान् स्वदेशं जयति। | ..................... | ..................... |

## कालाध्वनोः कर्मयोगे

कालः, अध्वा च यत्र कर्मत्वमायाति तत्र द्वितीया विभक्तिः प्रयुज्यते।

कालाध्वनोः कर्मयोगे

कालः - घण्टा, दिनं, रात्रिः, पूर्वाह्नः, अपराह्नः....................।

अध्वा - क्रोशः, मार्गः.........................।

उदा - सः रात्रिम् उवास।

गणेशः पञ्चक्रोशं यावत् अचलत्।

- प्रदत्तस्य शब्दस्य द्वितीयाविभक्तिरूपेण पूरयत।

1. श्रीरामः भरद्वाजाश्रमे ..................... उवास। (रात्रिः)
2. वयं ..................... यावत् गच्छामः। (पञ्चक्रोशः)
3. राधा मातुलगृहे ..................... वसति स्म। (सप्तदिनं)
4. ..................... यावत् इयं नदी कुटिला। (क्रोशः)
5. अनन्तपुरीगमनाय ..................... आश्रयामः। (एषः पन्थाः)

- विना, ऋते, अन्तरेण, परितः अभितः, निकषा, धिक्, हा, सर्वतः, अनु, एतेषु, परेषु, पूर्वपदे द्वितीयाविभक्तिः प्रयुज्यते।

यथा - जलं विना जीवितुमसाध्यं भवति।

वायुं ऋते जीविनः न जीवन्ति।

कृष्णं परितः / सर्वतः / अभितः गोपिकाः वर्तन्ते।

हा धिक् मन्दभाग्यम्।

भूपतिः छायेव ताम् अन्वगच्छत्।

- प्रदत्तस्य पदस्य उचितरूपेण वाक्यानि पूरयत।

1. मम गृहं .............. निकषा वर्तते। (विद्यालयः)
2. निरपराधदण्डकं .............. धिक्। (राजा)

3. ............... उभयतः नद्यौ वहतः। (ग्रामः)

4. ............... परितः छात्राः वर्तन्ते। (अध्यापकः)

5. सज्जननिन्दकं ............... धिक्। (दुर्जनाः)

6. ............... अन्तरा अयोध्यायाः सुखं नास्ति। (रामः)

7. ............... ऋते बालकस्य जीवनमसाध्यम्। (क्षीरम्)

8. मत्स्याः ............... विना न जीवन्ति। (जलं)

9. ............... विना दशदिनमितः मनुष्यस्य जीवनं साध्यम्।

10. जनाः सदा ............... अनुभवन्ति। (आनन्दः)

11. हा ...............। (दुर्जनसेवकः)

12. ...............अभितः सुहृदौ तिष्ठतः। (अहम्)

**उपान्वध्याङ्वसः**

अधि, आ, उप, अनु + वस् धातोः आधारः द्वितीया विभक्तौ प्रयुज्यते। एषु उपसर्गेषु परेषु वस् धातोः आधारः द्वितीयाविभक्तौ प्रयोज्यः।

यथा - लङ्कां च सुखमावसत्।

सेना वनम् उपवसति। (वनस्य समीपे वसति इत्यर्थः)

सः नगरम् अनुवसति। (वनस्य समीपे वसति इत्यर्थः)

- प्रदत्तवाक्यानि शोधयत।

1. जनाः ग्रामेषु आवसन्ति।

2. कामधेनुः स्वर्गे आवसति।

3. के के मम गृहस्य अनुवसन्ति ?

4. वयं समुद्रतीरे अनुवसामः।

5. सः किष्किन्धायाम् अध्युवास।

## अधिशीङ्स्थासां कर्म

अधि + शीङ् (शेते) स्था (तिष्ठति) धातोः आधारः द्वितीयाविभक्तौ प्रयुज्यते।

यथा - खट्वाम् अधिशेते।

स्वर्गम् अधितिष्ठति।

- पदस्य उचितरूपेण पूरयत।

1. सहस्रशः जनाः ................... अधिशेरते। (मैदानं)
2. वानराः ................... अधितिष्ठन्ति। (वृक्षं)
3. वासुकिः ................... अतितिष्ठति। (पातालं)
4. पूर्विकाः ................... अधिशेरते। (गुहा)
5. नक्षत्राणि ................... अध्यतिष्ठन्। (आकाशः)

# तृतीया विभक्तिः (करणकारकम्)

कर्तरि कर्मवाक्यस्य हेत्वर्थे करणेऽपि च

स्वभावार्थे सहार्थे च हीनयोगे विना सह

अलं प्रयोजनस्यार्थे लक्षणे फलप्राप्तिके

विकृताङ्गे तृतीयैवं सुधीभिः सम्प्रकीर्तिता।।

## कर्मवाक्यस्य कर्तरि

कर्मप्रधानस्य वाक्यस्य कर्ता तृतीयाविभक्तौ प्रयुज्यते।

यथा - रामेण बाली हतः।

अस्मिन् वाक्ये क्रियायाः फलाश्रयः भवति बाली। अतः तत्कर्म। कर्मणः प्राधान्यविवक्षा चात्र वर्तते। इत्यतः कर्मणिप्रयोगः। कर्मणि प्रयोगे कर्ता तृतीयाविभक्तौ प्रयुज्यते।

(कर्तृकरणयोः तृतीया।।)

- दत्तस्य पदस्य उचितरूपेण वाक्यं पूरयत।

1. .............. जन्तवः पाल्यन्ते। (जनाः)
2. .............. गजः दृष्टः। (अहं)
3. देवालयः .............. गम्यते। (भक्ताः)
4. विदग्धैः .............. बध्यते। (मत्तगजः)
5. .............. रोगिणः परिचर्यन्ते। (भिषग्वरः)

**हेत्वर्थे**

कारणार्थे तृतीया विभक्तिः प्रयुज्यते।

यथा - ज्वरेण मृतः।

वृक्षाः वातेन कम्पन्ते।

- प्रदत्तेषु वाक्येषु हेतुं चित्वा लिखत।

1. जनाः लोभेन मोहिताः भवन्ति। ................................
2. कर्मणैव हि संसिद्धिम् आस्थिताः जनकादयः। ................................
3. पापेनानेन कलुषितं तस्य जीवितम्। ................................
4. अनुपस्थितिना सा पराजिता। ................................
5. तृषया पीडिताः जनाः कूपसमीपमास्थितवन्तः। ................................

**करणे**

क्रियासिद्धौ अत्यन्तोपकारकं करणं भवति। येन विना क्रियासिद्धिः न भवति, यत्सत्वे एव क्रियासिद्धिः भवति तत् करणम्।

यथा - पाचकः छुरिकया छिनत्ति।

अत्र छेदनकर्म छुरिकायाः भावे एव सम्भवति इत्यतः छुरिका छेदनकर्मणः करणम्। करणे तृतीयाविभक्तिः कार्या। छुरिकया इति तृतीया।

- प्रदत्तस्य पदस्य तृतीयविभक्तिना रिक्तांशान् पूरयत।

1. राधिका वामेन ............... लिखति। (करः)

2. खगाः ............... डयन्ते। (पक्षौ)

3. जनाः ............... नदीं तरन्ति। (नौका)

4. ............... द्वारम् उद्घाटयति। (कुञ्चिका)

5. बालकाः ............... क्रीडन्ति। (कन्दुकः)

6. श्रीरामः ............... (बाणः) बालिनं हतवान्।

7. वैज्ञानिकः ............... (सूक्ष्मदर्शिनी) पश्यति।

8. कृषीवलः वृक्षान् ............... (जलं) सिञ्चन्ति।

9. विमानं ............... (आकाशमार्गः) गच्छति।

**स्वभावार्थे सहार्थे च**

स्वभावः - प्रकृतिः। प्रकृत्यर्थे तृतीयाविभक्तिः प्रयुज्यते।

यथा - प्रकृत्या मनोहरः।

स्वभावेन शान्तः।

वर्णेन ब्राह्मणः।

सुखेन वसति।

सह समं सार्धम् एते तृतीयया सह प्रवर्तन्ते।

उदा - रामेण सह / समं / सार्धं गच्छति।

सहयुक्तेऽप्रधाने।

- प्रदत्तस्य पदस्य उचितरूपेण वाक्यानि पूरयत।

1. अध्यापकः ............... सार्धम् आगच्छति। (शिष्याः)

2. रामः ............... सह काननमगच्छत्। (लक्ष्मणः)

3. भवान् ............... समम् आपणं गच्छति। (कः)

4. मृगाः कानने ............... वसन्ति। (सुखं)

5. जवहर्लाल् महाशयः .............. शान्तः आसीत्। (स्वभावः)

6. दरिद्रः गोपः .............. कालमनयत्। (दुःखं)

हीन, विना, अलं (निष्प्रयोजनार्थे) शब्दयोगे तृतीया विभक्तिः कार्या।

यथा - विद्यया हीनाः न शोभन्ते।

जलेन विना स्नानमसाध्यम्।

अलं रोदनेन।

- स्ववाक्येषु योजयत।

1. विना

.........................................................................................।

2. हीनः

.........................................................................................।

3. अलं

.........................................................................................।

**लक्षणे फलप्राप्तिके**

'दिवसेन श्लोकम् अपठम्' इति वाक्ये श्लोकपठनस्य सफलता एव तृतीयान्तपदेन दिवसेन सूच्यते।

उदा - राधा मासेन व्याकरणम् अपठत्। इत्यत्र एकेन मासेन यत् पठितं तत् सफलमभवत् इत्याशयः।

अपवर्गे तृतीया

- अधः प्रदत्तानां वाक्यानाम् आशयं विशदयत।

1. वर्षत्रयेण वैद्यशास्त्रमधीतम्।

.........................................................................................

2. मासेन एकेन मातुः परिचरणं कृतम्।

.........................................................................................

**विकृताङ्गे**

अङ्गानां विकृतिं तृतीयया एव द्योतयति।

उदा - अक्ष्णा काणः।

पादेन पङ्गुः।

- अधः प्रदत्तवाक्येषु कोष्ठके दत्तपदस्य उचितरूपेण रिक्तांशान् पूरयत।

1. धृतराष्ट्रः ............... काणः आसीत्। (अक्षी)
2. अगस्त्यः ............... पङ्गुः आसीत्। (पादः)
3. केचन जना ............... बधिराः भवन्ति। (श्रोत्रम्)
4. हेलन् केल्लर् ............... मूकाऽसीत्। (वाक्)

## चतुर्थीविभक्तिः

- सम्प्रदानम्

कर्मणा यमभिप्रैति स सम्प्रदानम्। अभिप्रैति - വിവക്ഷിക്കുന്നു. പറയാൻ താത്പര്യപ്പെടുന്നു.

കർത്താവ് ദാനക്രിയയാൽ കർമ്മംകൊണ്ട് ആരെയാണോ ഉദ്ദേശിക്കുന്നത് എന്നർത്ഥം. അതാകുന്നു സംപ്രദാനം.

उदा - आनन्दः आचार्याय गां ददाति। ആനന്ദൻ ആചാര്യന് പശുവിനെ കൊടുക്കുന്നു.

ഇവിടെ ആനന്ദൻ ദാനക്രിയയാൽ ഗോവിനെ ആചാര്യനെ ഉദ്ദേശിക്കുന്നു, ആഗ്രഹിക്കുന്നു.

- ക്രിയയാൽത്തന്നെ ഏതിനോട് ബന്ധപ്പെടണമെന്ന് കർത്താവ് ആഗ്രഹിയ്ക്കുന്നുവോ അതും സംപ്രദാനമാകുന്നു.

(तादर्थ्ये चतुर्थी वाच्या।)

उदा - योद्धा युद्धाय सन्नह्यते। യോദ്ധാവ് യുദ്ധത്തിന് തയ്യാറെടുക്കുന്നു.

- സംപ്രദാനകാരകത്തിൽ ചതുർത്ഥി പ്രയോഗിക്കുന്നു.



चुतर्थी सम्प्रदाने।

उदा - पुत्राय पुस्तकं यच्छति। പുത്രനായിക്കൊണ്ട് പുസ്തകം നല്കുന്നു.

- 'അതിനുവേണ്ടി' എന്ന അർത്ഥം ദ്യോതിപ്പിയ്ക്കുവാൻ ചതുർത്ഥി പ്രയോഗിയ്ക്കുന്നു.

उदा - यूपाय दारु - യാഗസ്തംഭത്തിനുവേണ്ടിയുള്ള തൂണ്.

कुण्डलाय हिरण्यम् - കുണ്ഡലത്തിനുവേണ്ടിയുള്ള സ്വർണ്ണം.

अवहननाय उलूखलम् - ഉമി നീക്കുന്നതിനുവേണ്ടി ഉരൽ.

- താദർത്ഥ്യം കാണിക്കുവാൻ ചതുർത്ഥി പ്രയോഗിക്കുമ്പോൾ 'ആകുന്നു', 'ഭവിയ്ക്കുന്നു' മുതലായ അർത്ഥങ്ങൾ ദ്യോതിപ്പിയ്ക്കുന്ന ക്രിയാരൂപങ്ങൾ ത്യജിക്കാറുണ്ട്.

उदा - काव्यं यशसेऽर्थकृते। കാവ്യം കീർത്തിക്കും അർത്ഥലാഭത്തിനും വേണ്ടിയാകുന്നു. अस्ति എന്ന ക്രിയാപദം ത്യജിച്ചിരിയ്ക്കുന്നു.

- താദർത്ഥികക്രിയാരൂപങ്ങളും ചിലപ്പോൾ ഉപേക്ഷിയ്ക്കാറുണ്ട്.

उदा - त्यागाय संभृतार्थानाम्। ത്യാഗത്തിനുവേണ്ടി (ധനം) സംഭരിക്കുന്നവരുടെ.

(ഇവിടെ त्यागं कर्तुं എന്നാണുദ്ദേശിക്കുന്നത്. എന്നാൽ कर्तुं ഉപേക്ഷിച്ചിരിയ്ക്കുന്നു.)

- രുച്യർത്ഥധാതുക്കൾ പ്രയോഗിക്കുമ്പോൾ പ്രീതിഭാജനത്തെക്കുറിക്കുന്ന ശബ്ദങ്ങൾ ചതുർത്ഥിയിൽവരും.

रुच्यर्थानां प्रीयमाणः। प्रीयमाणः - പ്രീതനാകുന്നവൻ

उदा - हरये रोचते भक्तिः। ഹരിക്ക് ഭക്തി ഇഷ്ടപ്പെടുന്നു

बालाय स्वदतेऽपूपः। ബാലന് അപ്പം രുചിയ്ക്കുന്നു.

- श्लाघ् സ്തുതിയ്ക്കുക, ह्नु മറയ്ക്കുക, स्था നില്ക്കുക, शप् ശപിയ്ക്കുക, ഈ ധാതുക്കൾ, ഇവ വഴി എന്തെങ്കിലും വികാരം അറിയിയ്ക്കുവാൻ ഉദ്ദേശിക്കുന്നെങ്കിൽ ചതുർത്ഥിയോടന്വയിക്കുന്നു.

(श्लाघ्ह्नुङ्स्थाशपां ज्ञीप्स्यमानः। ज्ञप्स्यमानः - അറിയപ്പെടേണ്ട ആൾ)

उदा - गोविन्दाय श्लाघते। ഗോവിന്ദനെ ശ്ലാഘിയ്ക്കുന്നു

राधा कृष्णाय ह्नुते। രാധ കൃഷ്ണനിൽ (വികാരം) മറയ്ക്കുന്നു

राधा कृष्णाय शपते। രാധ കൃഷ്ണനോട് ശപഥം ചെയ്യുന്നു

राधा कृष्णाय तिष्ठते। രാധ കൃഷ്ണനുവേണ്ടി കാത്തുനില്ക്കുന്നു

- धृ കടപ്പെടുക, स्पृह् തീവ്രമായി ആഗ്രഹിയ്ക്കുക, क्रुध् കോപിയ്ക്കുക, द्रुह् ഉപദ്രവിയ്ക്കുക, असूय् അസൂയപ്പെടുക, ईर्ष्य् കോപിയ്ക്കുക എന്നീ ധാതുക്കൾ ചതുർത്ഥിയോടന്വയിക്കുന്നു.,

धारेरुत्तमर्णः। धारेः 'धारि' യുടെ ഷഷ്ഠി धारि 'धृ' ധാതുവിന്റെ प्रयोजकम्। स्पृहेरीप्सितः।

उदा - वृक्षसेचने द्वे धारयसि मे। വൃക്ഷങ്ങളെ നനയ്ക്കുന്ന വകയിൽ നീ എനിയ്ക്ക് രണ്ട് നന കടപ്പെട്ടിരിയ്ക്കുന്നു.

स्पृहयामि खलु दुर्ललितायास्मै। ഈ കുസൃതിക്കുട്ടനിൽ എനിയ്ക്ക് കൊതി തോന്നുന്നു.

- വെറും ആഗ്രഹം ദ്യോതിപ്പിക്കുമ്പോൾ स्पृह् ധാതു द्वितीय വിഭക്തിയോടന്വയിക്കുന്നു.

पुष्पाणि स्पृहयते അവൻ പുഷ്പങ്ങൾ ലഭിയ്ക്കുവാൻ ആഗ്രഹിയ്ക്കുന്നു

माधवाय क्रुध्यति അവൻ മാധവനോട് കോപിയ്ക്കുന്നു

कृष्णाय द्रुह्यति അവൻ കൃഷ്ണനെ ദ്രോഹിയ്ക്കുന്നു.

- क्रुध् द्रुह् ഇവ ഉപസർഗ്ഗം ചേരുമ്പോൾ द्वितीया വിഭക്തിയോടന്വയിയ്ക്കുന്നു.

उदा - संक्रुध् (सम् क्रुध्) - किं मां संक्रुध्यसि? നീ എന്തിന് എന്നോട് കോപിയ്ക്കുന്നു?

अभिद्रुह् (अभि द्रुह्) गणेशम् अभिद्रुह्यति। അവൻ ഗണേശനെ ദ്രോഹിയ്ക്കുന്നു.

"क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः।
क्रुधद्रुहोरुपसृष्टयोः कर्म।।"

- കഴിയുക, ആവുക, ഭവിയ്ക്കുക, മതിയാവുക മുതലായ അർത്ഥങ്ങൾ ദ്യോതിപ്പിയ്ക്കുന്ന ക്നുപ്, ജന്, സംപദ്, ആസ്, പ്രഭു തുടങ്ങിയ ധാതുക്കൾ ചതുർഥിയോടന്വയിയ്ക്കുന്നു.

("क्लृपिसंपद्यमाने च चतुर्थी वक्तव्या।")

उदा - भक्तिर्ज्ञानाय कल्पते। ഭക്തിയ്ക്ക് ജ്ഞാനം ഉളവാക്കുവാൻ കഴിയും.

साधोः शिक्षा गुणाय सम्पद्यते, नासाधोः। ശിക്ഷണം ശിഷ്ടന്റെ നന്മയ്ക്കായി ഭവിയ്ക്കുന്നു, ദുഷ്ടന്റെയല്ല.

यवागूः मूत्राय जायते। ബാർലിക്കഞ്ഞി മൂത്രം വർദ്ധിപ്പിയ്ക്കുവാൻ ഉതകുന്നു.

- ചിലപ്പോൾ, കഴിയുക മുതലായ അർത്ഥങ്ങൾ ദ്യോതിപ്പിയ്ക്കുന്ന ക്രിയാരൂപങ്ങൾ വിട്ടുകളയാറുണ്ട്.

उदा - उपदेशो मूर्खाणां प्रकोपाय, न शान्तये। ഉപദേശം മൂർഖന്മാരുടെ പ്രകോപനത്തിനായി ഭവിയ്ക്കുന്നു, ശാന്തിയ്ക്കായല്ല.

- നമസ്, സ്വസ്തി, സ്വാഹാ, സ്വധാ, അലം, വഷഡ് എന്നീ അവ്യയങ്ങൾ ചതുർഥിയോടന്വയിയ്ക്കുന്നു.

'नमः स्वस्तिस्वाहास्वधालं वषड्योगाच्च।'

उदा - नमस्त्रिमूर्तये तुभ्यम्। ത്രിമൂർത്തിയായ അങ്ങേയ്ക്ക് വന്ദനം.

स्वस्त्यस्तु ते। അങ്ങേയ്ക്ക് സ്വസ്തി.

अग्नये स्वाहा। അഗ്നിയ്ക്ക് ഈ ബലി.

स्वधा पितृभ्यः। പിതാക്കൾക്ക് ഈ ബലി.

अलमेषा क्षुधितस्य तृप्त्यै। ഇവൾ (പശു) ക്ഷുധിതനായ (എന്റെ) സംതൃപ്തിയ്ക്ക് മതിയാകും.

- ദുർന്നിമിത്തത്തെയോ മറ്റോ കുറിച്ച് സൂചന നല്കുന്ന എന്ന അർത്ഥം ദ്യോതിപ്പിയ്ക്കുവാൻ ചതുർത്ഥി പ്രയോഗിയ്ക്കുന്നു.

उत्पातेन ज्ञाप्यमाने चतुर्थी वक्तव्या।

(उत्पातम् അടയാളം, ദുർന്നിമിത്തം, ഉത്പാതത്താൽ അറിയപ്പെടുന്നത് ചതുർത്ഥിയിൽ)

उदा - मांसौदनाय व्यवहरति मृगः। മാംസഭോജനത്തിന് വകയുണ്ടെന്ന് മാനിന്റെ കരച്ചിൽ സൂചന നല്കുന്നു.

वाताय कपिला विद्युदातपायातिलोहिनी। തവിട്ടു നിറമുള്ള ഇടിമിന്നൽ കൊടുങ്കാറ്റിനെയും കടുംചുമപ്പുള്ളത് ചൂടിനെയും കുറിച്ച് മുന്നറിയിപ്പ് നല്കുന്നു.

- हित ശബ്ദം ചതുർത്ഥിയോടന്വയിയ്ക്കുന്നു.

'हितयोगे चतुर्थी वक्तव्या।'

उदा - धनिकाय हितं। ധനികന് ഉപകാരപ്രദം.

- അവജ്ഞാർത്ഥകമായി പ്രയോഗിക്കുമ്പോൾ ദിവാദിഗണത്തിൽപ്പെട്ട 'मत्' धातु വിന്റെ അപ്രധാനകർമം പ്രാണിയല്ല എങ്കിൽ ചതുർത്ഥിയിലോ ദ്വിതീയയിലോ വരും.

मन्यकर्मण्यनादरे विभाषाऽप्राणिषु।

मन्य - मन् ധാതു दिवादिगण മെന്ന് കാണിയ്ക്കുവാൻ വികരണപ്രത്യയം ചേർത്തിരിയ്ക്കുന്നു.

उदा - न त्वां तृणाय मन्ये। ഞാൻ നിന്നെ പുല്ലിനോളം മതിയ്ക്കുന്നില്ല.

न त्वां तृणं मन्ये। ഞാൻ നിന്നെ പുല്ലിനോളം മതിയ്ക്കുന്നില്ല.

- अप्रधानकर्म नौ, काक, अन्न, शृगाल ഇവയിലൊന്നാണെങ്കിൽ ദ്വിതീയയിൽ മാത്രമേ വരൂ.

यदेतदप्राणिष्विति तदनावादिष्विति वक्तव्यम्।

अप्राणिषु എന്നത് अनावादिषु എന്ന് പറയണം.

नावादि - नौ, काक, अन्न, शृगाल।

उदा - न त्वां काकं मन्ये। ഞാൻ നിന്നെ ഒരു കാക്കയോളം മതിക്കുന്നില്ല.

सम्प्रदाने चतुर्थी स्यात् तादर्थ्यं च क्रियायुते।
रुच्यर्थानां प्रीयमाणे नमोयोगे च सा भवेत्।।

**प्रवर्तनानि**

- प्रादेशिकभाषायां विवर्तयत।

1. नृपतिः हरये कुप्यति।

.............................................................................................

2. निष्कान् धारयति रामाय हरिः। (निष्कः - सुवर्णनाणकः।)

.............................................................................................

3. विनयः सुखाय भवति।

..........................................................................................

4. बालः मोदकेभ्यः स्पृहयति।

..........................................................................................

5. स्वस्ति हरये।

..........................................................................................

6. नमो देवेभ्यः।

..........................................................................................

7. अतिथिभ्योऽन्नं यच्छति।

..........................................................................................

8. रामः ब्राह्मणेभ्यो निष्कान् यच्छति।

..........................................................................................

- अधोदत्तानां वाक्यानां शुद्धं रूपं लिखत।

1. स्नानेन नदीं गच्छति। ..........................................
2. जनकस्य नमः। ..........................................
3. शिष्याणां स्वस्ति। ..........................................
4. पुष्पेषु वनं गच्छति। ..........................................
5. इदं मम रोचते। ..........................................
6. स तव शतं धारयति। ..........................................
7. सः त्वां क्रुध्यति। ..........................................
8. रामेण कृष्णं कन्दुकः दीयते। ..........................................
9. कृष्णस्य पत्नी फलानि रोचन्ते। ..........................................
10. क्रीडायै प्रविशत्युद्यानम्। ..........................................

## पञ्चमीविभक्तिः

अपादाने ल्यबर्थेच योगे पूर्वादिभिस्तथा।

उत्कर्षे पञ्चमी ज्ञेया हेत्वर्थे तु विभाषया।

ऋते विनादिभिर्योगे पञ्चमी च स्मृता बुधैः।

- അപാദാനമാണ് पञ्चमी विभक्ति യുടെ കാരകം. എടുത്തുമാറ്റുക, നീക്കുക തുടങ്ങിയ അർത്ഥം അപാദാനത്തിന് പറയാം. अपादानकारकं ഒരു വസ്തുവിന് മറ്റൊന്നിനോടുള്ള അകൽച്ചയെ ദ്യോതിപ്പിയ്ക്കുന്നു.

ध्रुवमपायेऽपादानम्।

ध्रुवं സ്ഥിരമായ വസ്തു अपायं അകന്നുപോകൽ

അകൽച്ചയിൽ (अपाये) അതിനായി നിലകൊള്ളുന്നു (ध्रुवं) വസ്തുവിനോടുള്ള ബന്ധമാകുന്നു കാരകത്തിൽ अपादानम्।

| | | |
|---|---|---|
| उदा - | शिखरादवरोहति। | അവൻ ശിഖരത്തിൽ നിന്ന് ഇറങ്ങുന്നു |
| | नगरादायाति। | അവൻ പട്ടണത്തിൽ നിന്നു വരുന്നു |
| | धावतोऽश्वात् पतति। | ഓടുന്ന കുതിരയിൽ നിന്നും വീഴുന്നു |

- അകൽച്ച മാനസികവുമാകാം. വാസ്തവമായിക്കൊള്ളണമെന്നില്ല.

जुगुप्सा विरामप्रमादार्थानामुपसंख्यानम्।

| | | |
|---|---|---|
| उदा - | अधर्मात् जुगुप्सते। | അവൻ അധർമ്മത്തെ വെറുക്കുന്നു. മനസാ അധർമ്മത്തിൽ നിന്നകലുന്നുവെന്നർത്ഥം. |
| | धर्माद् प्रमाद्यामि | അവൻ ധർമ്മത്തിൽ നിന്ന് തെന്നിമാറുന്നു. |

- अपादानकारक ത്തിന് पञ्चमीविभक्तिः പ്രയോഗിയ്ക്കുന്നു.

| | | |
|---|---|---|
| उदा - | रथात् पतति | അവൻ രഥത്തിൽ നിന്ന് വീഴുന്നു. |

- ഭയപ്പെടുക, ത്രാണം ചെയ്യുക എന്നീ അർത്ഥങ്ങളുള്ള ധാതുക്കൾ പ്രയോഗിക്കുമ്പോൾ ഭയഹേതു പഞ്ചമിയിൽ വരും.

भीत्रार्थानां भयहेतुः।

उदा - न भीतो मरणादस्मि। ഞാൻ മരണത്തെ ഭയപ്പെടുന്നില്ല.

पाहि मां मरणात्। എന്നെ മരണത്തിൽ നിന്ന് രക്ഷിയ്ക്കുക.

- 'ദുസ്സഹം' എന്നർത്ഥത്തിൽ 'पराजि' ധാതു പഞ്ചമിയോടന്വയിയ്ക്കുന്നു.

पराजेरसोढः। പരാജി ധാതുവിന് (पराजेः) എന്ത് ദുസ്സഹമോ (असोढः) അത് അപാദാനകാരകം.

उदा - अध्ययनात् पराजयते। അവന് അദ്ധ്യയനം ദുസ്സഹമാകുന്നു.

- प्रभृति, आरभ्य, बहिस्, अनन्तरं, परं, ऊर्ध्वं എന്നിവയുടെ യോഗത്തിലും

| | | |
|---|---|---|
| उदा - | शैशवात्प्रभृति पोषितामिमाम् | ബാല്യം മുതൽ വളർത്തിവന്ന ഇവളെ |
| | प्रथमावलोकदिवसादारभ्य | ആദ്യംകണ്ട ദിവസം മുതൽ |
| | ग्रामाद् बहिः | ഗ്രാമത്തിന് വെളിയിൽ |
| | अस्मात् परम् | ഇവനുശേഷം |
| | ऊर्ध्वं मुहूर्तात् | ഒരു വിനാഴിക കഴിഞ്ഞ് |

- अन्य, आरात्, इतर, ऋते ഇവയും ഇവയുടെ അർത്ഥമുള്ള ശബ്ദങ്ങളും; ദിഗ്വാചികൾ; അഞ്ച് ഉത്തരപദമായി വരുന്ന സമാസങ്ങൾ आ, आहि എന്നീ പ്രത്യയങ്ങൾ ചേർന്ന ശബ്ദങ്ങൾ, ഇവയുടെ യോഗത്തിലും.

अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते।

अन्य + आरात् + इतर + ऋते + दिक्शब्द + अञ्चू + उत्तरपद + आच् + आहि + युक्ते।
अञ्चु - अञ्च् धातु।

| | | |
|---|---|---|
| उदा - | कृष्णादन्या गतिः नास्ति | കൃഷ്ണനല്ലാതെ ഗതിയില്ല |
| | आराद्वनात् | വനത്തിനു സമീപേ, ദൂരത്തിൽ |
| | इतरो रावणादेष यदि | ഇവൻ രാവണനിൽ നിന്ന് ഭിന്നനെങ്കിൽ |
| | ऋते तुरङ्गमात् किमिच्छसि? | കുതിര ഒഴിച്ച് അങ്ങ് എന്താഗ്രഹിയ്ക്കുന്നു? |

ग्रामात् पूर्वम् — ഗ്രാമത്തിന് കിഴക്ക് (ദിഗ്‌വാചി)

चैत्रात् पूर्वः फाल्गुनः — ചൈത്രമാസത്തിനു മുമ്പാകുന്നു ഫാല്ഗുനമാസം (കാലവാചി)

- ദിഗ്‌വാചിശബ്ദങ്ങൾ ശരീരാവയവത്തെക്കുറിക്കുമ്പോൾ പഞ്ചമീവിഭക്തിയ്ക്കുപകരം ഷഷ്ഠീവിഭക്തി പ്രയോഗിക്കുന്നു.

उदा - पूर्वं कायस्य — ശരീരത്തിന്റെ പൂർവഭാഗം.

प्राग् ग्रामात् — ഗ്രാമത്തിന് കിഴക്ക് (प्राक् - प्र + अञ्च्)

प्रत्यग् गामात् — ഗ്രാമത്തിനു പടിഞ്ഞാറ് (प्रत्यक् - प्रति + अञ्च्)

दक्षिणा ग्रामात् — ഗ്രാമത്തിന് തെക്ക് (आ (आच्))

दक्षिणाहि ग्रामात् — ഗ്രാമത്തിന് തെക്ക് (आहि)

- अप, आ, परि എന്നീ കർമ്മപ്രവചനീയങ്ങളുടെ യോഗത്തിലും.

**पञ्चम्यपाङ्परिभिः (कर्मप्रवचनीययुक्ते)**

पञ्चमी + अप + आङ् + परिभिः + कर्मप्रवचनीय + युक्ते। (आङ् - आ)

ക്രിയയോടല്ലാത്ത, നാമത്തോട് അന്വയിയ്ക്കുന്ന അവ്യയത്തിന് കർമ്മപ്രവചനീയമെന്ന് പേര്. अति, अधि, अनु, अभि, आ, उप, परि, प्रति, सु മുതലായവയെ കർമ്മപ്രവചനീയമായും പ്രയോഗിയ്ക്കുന്നു.

उदा - अप त्रिगर्तेभ्यो वृष्टो देवः। ത്രിഗർത്തന്മാരുടെ സ്ഥലത്തൊഴികെ മഴ പെയ്തു. (अप - കൂടാതെ)

आ परितोषाद् विदुषाम्। — വിദ്വാന്മാർ സന്തുഷ്ടരാകുന്നതുവരെ

आ मूलात् श्रोतुमिच्छामि। — തുടക്കം മുതൽ കേൾക്കുവാനാഗ്രഹിക്കുന്നു. (आ - വരെ, മുതൽ)

परित्रिगर्तेभ्यो वृष्टो देवः। — ത്രിഗർത്തന്മാരുടെ സ്ഥലത്തിനുചുറ്റും മഴ പെയ്തു.

- പര്യായങ്ങളായ पृथक्, विना, नाना എന്നിവ पञ्चमी, द्वितीया, तृतीया ഇവയോടന്വയിയ്ക്കും.

**पृथग्विनानानाभिस्तृतीयान्यतरस्याम्।**

पञ्चमी, द्वितीया ഇവ അനുവർത്തിയ്ക്കുന്നു.

| | | |
|---|---|---|
| उदा - | महेशात् विना। | മഹേശിനെ കൂടാതെ |
| | महेशं विना। | ” |
| | महेशेन विना। | ” |
| | पृथग् गणेशात्। | ഗണേശിനെ കൂടാതെ |
| | पृथग् गणेशं। | ” |
| | पृथग् गणेशेन | ” |
| | नाना रमायाः | രമയെ കൂടാതെ |
| | नाना रमां | ” |
| | नाना रमया | ” |
| | नाना नारीं निष्फला लोकयात्रा | നാരിയെക്കൂടാതെ ലോകയാത്ര നിഷ്ഫലമാണ് |

- स्तोक, अल्प, कृच्छ्र, कतिपय ഇവ ക്രിയാവിശേഷണമായി ധാതുക്കളോടു ചേർത്ത് പ്രയോഗിക്കുമ്പോൾ പഞ്ചമിയും തൃതീയയും പ്രയോഗിയ്ക്കാം.

'करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य'। करणे + च + स्तोक + अल्प + कृच्छ्र + कतिपयस्य + असत्ववचनस्य। करणे च തൃതീയയിലും असत्ववचनं ദ്രവ്യവാചകമല്ലാത്തത് सत्ववचनं ആയി स्तोकं മുതലായവ പ്രയോഗിക്കുമ്പോൾ പഞ്ചമി പാടില്ല.

| | | |
|---|---|---|
| उदा - | स्तोकात् मुक्तः | അല്പംകൊണ്ട് മുക്തനായവൻ |
| | स्तोकेन मुक्तः | ” |
| | कृच्छ्रात् कृतः | ക്ലേശിച്ചു ചെയ്തു |
| | कृच्छ्रेण कृतः | ” |
| | कतिपयात् प्राप्तः | കുറച്ചു പ്രയത്നിച്ചു കിട്ടിയത് |
| | कतिपयेन प्राप्तः | ” |

स्तोकादि കൾ നാമവിശേഷണമാകുമ്പോൾ തൃതീയമാത്രമേ പാടുള്ളു. പഞ്ചമി പാടില്ല.

उदा - स्तोकेन विषेण हतः। അല്പം വിഷംകൊണ്ട് കൊല്ലപ്പെട്ടവൻ.

स्तोकात् विषात् हतः എന്ന് പ്രയോഗിയ്ക്കരുത്.

- दूर, अन्तिक എന്നീ ശബ്ദങ്ങളുടെയും ഇവയുടെ അർത്ഥമുള്ള ശബ്ദങ്ങളുടെയും യോഗത്തിൽ पञ्चमी, द्वितीया, तृतीया വിഭക്തി പ്രയോഗിക്കണം.

"दूरान्तिकार्थेभ्यो द्वितीया च"। 'च' ശബ്ദംകൊണ്ട് पञ्चमी, तृतीया വിഭക്തികളെ ഉദ്ദേശിച്ചിരിക്കുന്നു.

उदा - दूरात् ग्रामस्य ഗ്രാമത്തിന്നകലെ

दूरम् ग्रामस्य "

दूरेण ग्रामस्य "

अन्तिकात् ग्रामस्य। ഗ്രാമത്തിനുസമീപം

अन्तिकं ग्रामस्य। "

अन्तिकेन ग्रामस्य। "

**प्रवर्तनानि**

**मातृभाषायां विवर्तयत -**

1. सूतः रथाद् अपतत्। ..............................
2. बालकैः विनोदात् पाठः विस्मर्यते। ..............................
3. सज्जनाः दोषेभ्यः विषयान् उपेक्षन्ते। ..............................
4. वापीभ्यः जलं वहति। ..............................
5. बालकाः पाठशालाभ्यः आगच्छन्ति। ..............................
6. सुहृत् मित्रं पापान्निवारयति। ..............................
7. नास्ति मे शरणमृते कृष्णात्। ..............................

8. अश्वादवतरति योद्धा। ...........................................................................

9. नगरादारान्नदी प्रवहति। ........................................................................

10. गुरोः शास्त्रमधीते। ..............................................................................

- अधोदत्तानां वाक्यानां शुद्धं रूपं लिखत -

1. सः पर्वतस्य पतितः। ................................................
2. स सिंहस्य बिभेति। ................................................
3. वानरः वृक्षाणां फलानि क्षिपति। ................................................
4. पापस्य दुःखमुत्पाद्यते। ................................................
5. पल्वलानां वराहा उत्तिष्ठन्ति। ................................................

## षष्ठी विभक्तिः (सम्बन्धकारकम्)

सम्बन्धे कर्तरि प्रोक्ता कृदन्ते ल्युटि कर्मणि।
घञोर्योगेऽथ स्मृत्यर्थे दूरार्थे चान्तिके पुनः।।
कृते मध्ये समक्षे च सदृश सम मेलने।
निर्धारणे हेतुशब्दयोगे तस् प्रत्ययेऽपि च।।
अनादरेऽन्तरे शब्द किञ्चान्तशब्दमेलने।
प्रतिपूर्वे यच्च धातोः षष्ठी ज्ञेया विचक्षणैः।।

- सम्बन्धार्थे षष्ठी विभक्तिः स्वीक्रियते। द्वयोः वस्तुनोः सम्बन्धे द्योत्ये षष्ठी विभक्तिः कार्या। सम्बन्धाश्च बहुविधाः भवन्ति।

| | | | |
|---|---|---|---|
| यथा - | स्वस्वामिसम्बन्धः | - | देवस्य आलयः |
| | जन्यजनकसम्बन्धः | - | दशरथस्य पुत्रः |
| | अवयवावयविसम्बन्धः | - | मम करः |
| | गुरुशिष्यसबन्धः | - | वरतन्तोः शिष्यः |

- कोष्ठके प्रदत्तस्य पदस्य उचितरूपेण वाक्यं पूरयत।

1. .................. पुत्रः भरतः भ्रातृभक्तः भवति। (सुमित्रा)
2. .................. पुत्री कुत्र पठति? (युष्मद्)
3. तिरुवनन्तपुरं .................. राजधानी भवति। (केरलदेशः)
4. .................. पादा दीर्घाः भवन्ति। (चित्रोष्ट्रः)
5. .................. शाखासु बहवः खगाः अवसन्। (वृक्षाः)
6. कचः .................. प्रियशिष्यः आसीत्। (शुक्राचार्यः)
7. भारतं .................. राष्ट्रम्। (अस्मद्)
8. .................. सोदरी इन्दिरा विदेशेषु वसति। (सः)

कृदन्ते ल्युटि

भावार्थे क्रियाधातुभिः सह ल्युट् प्रत्ययं योजयित्वा कृदन्तनामानि निष्पाद्यन्ते।

उदा - गम् + ल्युट् - गमनम्।

पूज् + ल्युट् - पूजनम्।

कृदन्तनामानां कर्मणि कर्तरि च षष्ठी विभक्तिः उपयुज्यते।

उदा - रावणस्य हननम्।

मन्दिरस्य स्थानम्।

ईश्वरस्य पालनम्।

जगतः पालनम्।

- प्रदत्तस्य पदस्य उचितविभक्तिरूपेण वाक्यानि पूरयत।

1. .................. वनगमनम् अयोध्यावासिनां सर्वेषां दुःखदायकमभवत्। (रामः)
2. .................. घ्राणनं सर्वेषाम् आमोदकरम्। (पुष्पं)
3. .................. पठनं सर्वैः करणीयम्। (संस्कृतं)

4. ................ संरक्षणम् अस्माभिः कार्यम्। (मातृभूमिः)

5. ................. सेवनं सज्जनानां कर्म भवति। (आतुराः)

**कर्मणि**

कर्मणिप्रयोगेषु तव्य, अनीयर्, य प्रत्ययान्तेषु कृत्यान्तानां योगे कर्तरि वा षष्ठीविभक्तौ कर्तुः प्रयोगः वर्तते।

कृत्यानां कर्तरि वा

| | |
|---|---|
| मम इदं कर्म कर्तव्यम् | (तव्यत् प्रत्ययः) |
| तव स दृश्यः | (य) |
| मम लोकहितम् करणीयम् | (अनीयर्) |

- अध प्रदत्तानां क्रियापदानां तव्य, अनीयर्, य, प्रत्ययान्तपदानि लिखत।

उदा -

| | तव्यत् | य | अनीयर् |
|---|---|---|---|
| पठ् | पठितव्यं | पाठ्यं | पठनीयं |
| दाञ् | ............ | ............ | ............ |
| नीञ् | ............ | ............ | ............ |
| गम् | ............ | ............ | ............ |
| श्रु | ............ | ............ | ............ |
| दृश् | ............ | ............ | ............ |
| नर्त् | ............ | ............ | ............ |
| पा | ............ | ............ | ............ |

- कोष्ठके दत्तानि वाक्यानि उचितकर्तृपदेन पूरयत -

| | |
|---|---|
| ........................ सत्यं वक्तव्यम्। | (अस्माकं, अस्मासु) |
| ........................ धर्मः अनुष्ठेयः। | (जनानां, जनेषु) |
| सायाह्ने ........................ देवालयः गम्यः। | (मम, मयि) |

स्मृत्यर्थे

स्मृत्यर्थधातोः योगे कर्मणि षष्ठीविभक्तिः प्रयुज्यते।

यथा - मातुः स्मरति।

अत्र मातृसम्बन्धीनि कार्याणि स्मरति इत्यर्थः।

सौभद्रस्य स्मराम्यहम् ।

(सूत्रम् - अधीगर्थदयेशां कर्मणि।)

- रेखास्थानानि षष्ठीविभक्त्यन्तेन पदेन पूरयत।

1. दूरदेशवासी ........................ स्मरति। (पिता)
2. लक्ष्मणः ........................ स्मरति। (भ्राता)
3. सीता अशोकवनिकायां ........................ स्मरति। (भर्ता)
4. पवनतनयः ........................ स्मरति। (स्वामी)
5. भवानिदानीं ........................ स्मरति। (कः)

दूर - अन्तिक - कृते - मध्ये - समक्षे च।

एतेषां पदानां योगे षष्ठी विभक्तिः प्रयुज्यते।

उदा -
1. ग्रामस्य दूरे देवालयोऽस्ति।
2. राधायाः अन्तिके कृष्णः वर्तते।
3. राष्ट्रस्य कृते प्राणा अपि त्याज्याः।
4. तौ पुरुषौ राज्ञः समक्षमगच्छताम्।
5. तयोः मध्ये विवादोऽजायत।

- प्रदत्तस्य पदस्य उचितरूपेण वाक्यानि पूरयत।

1. बुधग्रहः ........................ दूरे वर्तते। (भूमिः)
2. ........................ दूरे काचन नदी अस्ति। (पत्तनं)
3. पुत्रैः ........................ अन्तिके एव वर्त्तितव्यम्। (माता)

4. ........................ कृते अतिलोभः न कार्यः। (अस्मद्)

5. ........................ कृते साहाय्यं करणीयम्। (समाजः)

6. दुःखार्तः सः ........................ समक्षं प्राप। (राजा)

7. ........................ मध्ये सुन्दरम् उद्यानं वर्तते। (नगर)

8. राजवीथिः ........................ मध्येऽस्ति। (पुरी)

**हेतुशब्दे, अन्तरे, अन्ते, तस् प्रत्ययान्ते च**

एतेषु परेषु षष्ठीविभक्तिः प्रयुज्यते।

उदा - 1. सुखस्य हेतोः जनाः क्लिश्यन्ते।

2. रामलक्ष्मणयोः अन्तरे सीता वर्तते।

3. चलच्चित्रप्रदर्शनस्य अन्ते सर्वे जनाः गताः।

4. तस्य दक्षिणतः राधा तिष्ठति।

- प्रदत्तस्य पदस्य उचितरूपेण वाक्यानि पूरयत।

1. अतिलोभः ........................ हेतुः भवति। (दुःखम्)

2. ........................ हेतोः जनाः विलपन्ति? (किम्)

3. ........................ अन्ते सर्वे भक्ताः सन्तुष्टाः। (देवीदर्शनं)

4. ........................ अन्ते छात्राः विद्यालयात् बहिः गच्छन्ति। (पठनं)

5. ........................ दक्षिणतः कन्याकुमारी वर्तते। (अनन्तपुरी)

6. यात्रिकैः ........................ दक्षिणतः एव गन्तव्यम्। (वीथिः)

अनादरे (निन्दायां)

अनादरे द्योत्ये षष्ठी विभक्तिः कार्या।

उदा - उपदिशतः गुरोः छात्राः कक्ष्यायाः
(गुरुम् अनादृत्य) बहिः अगच्छन्।

अनादरे सप्तमी विभक्तिश्च प्रयुज्यते।

- प्रदत्तस्य उचितरूपेण वाक्यानि पूरयत।

1. अन्नं याचतः ........................ माता गृहस्य अन्तः अगच्छत्। (भिक्षुः)
2. यात्रेच्छूनां ........................ मार्गे स्थितानां बस् यानं शीघ्रं गतम्। (छात्राः)
3. रुदत्याः ........................ पुत्रः दूरदेशं गतवान्। (माता)
4. भूमौ पततः ........................ जनाः शीघ्रं गताः। (आतुरः)
5. जले निमग्नस्य रक्षार्थं हस्तं प्रसारयतः ........................ सुहृदः गताः। (सः)
6. नन्दाः पशवः इव हताः पश्यतो ........................। (राक्षसः)
7. नृत्यन्त्याः ........................ सर्वे सभावासिनः सुप्ताः। (सा)

सम, सदृश, तुल्य शब्दाः तृतीयया च प्रयुज्यन्ते।

- सम, सदृश - तुल्य शब्दानां योगे षष्ठीविभक्तिः प्रयुज्यते।

उदा - रामस्य तुल्यः / सदृशः / समः।

कोष्ठकस्य सहाय्येन वाक्यानि पूरयत।

1. दधीचिः दानकार्येषु ...................... तुल्यः आसीत्। (कर्णः)
2. शान्तसमुद्रः ...................... समः इव लक्ष्यते। (नीलाकाशः)
3. केरवृक्षः ...................... सदृशः भवति। (कल्पवृक्षः)
4. केरलदेशः ...................... समः। (देवभूमिः)
5. अस्वस्थस्य जीवितं ...................... तुल्यं भवति। (नरकः)
6. रावणः ...................... तुल्यः आसीत्? (कः)
7. ...................... सदृशः कश्चन आगच्छति। (ब्राह्मणः)
8. श्रीरामः न ...................... अपि सदृशः। (कः)

## सप्तमी विभक्तिः (अधिकरणकारकम्)

आधारे त्रिविधे भावे भावलक्षण दर्शने।
संलग्नार्थे प्रवीणार्थे निर्धारणविधौ तथा।।

आधारः अधिकरणम्। "पुस्तकं हस्ते वर्तते" इत्यत्र पुस्तकस्य आधारः हस्तः भवति। अतः आधारभूतस्य हस्तस्य सप्तमीविभक्तौ प्रयोगः।

(सूत्रम् - सप्तम्यधिकरणे)

कर्तृकर्मद्वारा क्रियायाः आधारः अधिकरणसंज्ञः स्यात्।

आधारे आधेयस्य अवस्थितिमाश्रित्य आधारः त्रिधा।

**१. औपश्लेषिकः**

आधारे एकदेशमात्रव्याप्तः आधेयः चेत् सः औपश्लेषिकः। संयोगसम्बन्धमाश्रित्य वर्त्तमानः।

यथा - कटे आस्ते।
ग्रामे वसति।
नद्यां क्रीडति।

अत्र कटस्य, ग्रामस्य, नद्याश्च औपश्लेशिकतया आधारत्वम्।

**२. अभिव्यापकः**

आधारे आधेयस्य सर्वत्र अवस्थितिः अस्ति चेत् सः आधारः अभिव्यापकः।

यथा - तिले तैलम्।
इक्षौ माधुर्यम्।
घटे रूपम्।

**३. वैषयिकाधारः**

अमूर्तस्य वस्तुनः / कार्यस्य आधेयत्वं आधारेऽस्ति चेत् सः वैषयिकः।

यथा - माता पुत्रे स्निह्यति।

मातरि विश्वासः वर्तते।

बालस्य विजये इच्छा वर्तते।

- अधः प्रदत्तेषु वाक्येषु आधारस्य अधः रेखां कृत्वा तत्र त्रिषु आधारेषु क इति लिखत।

मनसि क्रोधः वर्तते। ............................

पर्यङ्के शेते। ............................

वने मृगाः वर्तन्ते। ............................

जले माधुर्यमस्ति। ............................

बस् याने जनाः वर्तन्ते। ............................

**भावलक्षणदर्शने**

यस्य भावेन (क्रियया) क्रियान्तरं लक्ष्यते तत्र सप्तमी विभक्तिः प्रयुज्यते।

**(यस्य भावेन भावलक्षणम्)**

यथ - रामे वनं गते सीता तमन्वगच्छत्।

अस्मिन् वाक्ये सीतायाः वनगमनकालः रामस्य वनगमनवेलया सूच्यते। अतः “रामे गते” इति सप्तमी विभक्तिः। ‘यदा....... तदा’ प्रयोगः भावलक्षणस्वरूपः एव।

यथा - यदा सूर्यः उदयते तदा कमलानि विकसन्ति।

अस्मिन् वाक्ये कमलानां विकासकालः सूर्योदयेन सूचितः।

- अध प्रदत्तानि वाक्यानि भावलक्षणसप्तम्यां परिवर्तयत।

1. यदा वृष्टिः आरभते तदा जनाः छत्रमुद्घाटयन्ति।

   ..................................................................

2. यदा शिशुः चलति तदा सः पतति।

   ..................................................................

3. यदा शाखा कम्पते तदा जम्बूफलानि पतन्ति।

   ..................................................................

4. यदा घण्टानादः श्रूयते तदा छात्राः कक्ष्यां प्रविशन्ति।

   ..........................................................

5. यदा बुभुक्षा बाधते तदा जनाः भोजनालयं प्रविशन्ति।

   ..........................................................

6. यदा मेघाः गर्जन्ति तदा बालाः भीताः भवति।

   ..........................................................

7. यदा विमानं पश्यति तदा बालकाः कोलाहलं कुर्वन्ति।

   ..........................................................

**अनादरे**

भावलक्षणसप्तमी अनादरस्य प्रकाशनाय अपि प्रयुज्यते।

यथा - पितरि पश्यति दारवश्ये दुरुक्तिपीडितः ध्रुवः निजाम्बां गतः।

अध्यक्षमहोदये भाषमाणे सति समाजिकाः सभायाः बहिर्गताः।

(N.B: अनादरे द्योत्ये षष्ठी, सप्तमी वा प्रयुज्यते)

**संलग्नार्थे प्रवीणार्थे**

संलग्नः - निलीनः

प्रवीणः - समर्थः

एषु अर्थेषु सप्तमीविभक्तिः प्रयुज्यते।

यथा - गणेशः सङ्गीते संलग्नः आसीत्।

वराहमिहिरः ज्योतिश्शास्त्रे प्रवीणः आसीत्।

- प्रदत्तस्य पदस्य उचितरूपेण वाक्यानि पूरयत।

1. श्रीशङ्करः ..................... संलग्नः आसीत्। (सन्यासः)
2. कालिदासः ..................... प्रवीणः आसीत्। (कवनं)
3. डा. एस्. राधाकृष्णः ..................... संलग्नः अभूत्। (विद्याभ्यासकार्ये)

4. भक्तः ..................... संलग्नः वर्तते। (ईश्वरः)

5. पाणिनिः ..................... प्रवीणः अभवत्। (व्याकरणम्)

6. रत्नाकरः "राम राम" इति ..................... संलग्नः अभूत्। (मन्त्रजपे)

निर्धारणविधौ

जाति - गुण - क्रिया - संज्ञादिभिः समुदायादेकस्य पृथक्करणं निर्धारणम्।

निर्धारणे सप्तमी विभक्तिः प्रयुज्यते।

यथा - 1. बालकेषु एषः उन्नततमः।

2. जीविषु मनुष्याः श्रेष्ठाः।

3. स्त्रीषु एषा सुन्दरी।

- प्रदत्तस्य पदस्य उचितरूपेण वाक्यानि पूरयत -

निला दीर्घतमा भवति। (नदी)

कृष्णा बहुक्षीरा इति श्रूयते। (गौः)

राजहंसाः श्रेष्ठाः। (हंसः)

फलरसः मे इष्टः। (पानीयं)

काशी प्रथिता वर्तते। (तीर्थस्थानं)

- भवेद्विभक्तिः प्रथमा कर्तृवाच्ये च कर्तरि।

सम्बुद्धौ नाममात्रे च कर्मवाच्ये कर्मणि।

क्वचिदव्यययोगे च प्रथमा कथ्यते बुधैः।

कर्तृवाच्यप्रयोगे तु द्वितीया कर्मकारके।

धिक्प्रतीत्यादिभिर्योगे क्रियायाश्च विशेषणे।

विनादिभिश्चैव द्वितीया संमता सताम्।

तृतीया करणे चैव कर्मवाच्यस्य कर्तरि।

सहार्थैश्च तथा हेतौ प्रकृत्यादिभ्य एव च।

ऊनार्थैर्वारणार्थैश्च सदृशार्थैस्तथैव च।
अङ्गिनो विकृतिर्येन तृतीया स्यात् तदङ्गतः।
सम्प्रदाने चतुर्थीस्यात् तादर्थ्यं च क्रियायुते।
रुच्यर्थानां प्रीयमाणे नमोयोगे च सा भवेत्।
अपादाने ल्यबर्थे च योगे पूर्वादिभिस्तथा।
उत्कर्षे पञ्चमी ज्ञेया हेत्वर्थे तु विभाषया।
ऋते विनादिभिर्योगे पञ्चमी च स्मृता बुधैः।
षष्ठी भवति सम्बन्धे कृदन्ते कर्तृकर्मणोः
तृतीया स्यात् तथा षष्ठी कृत्यानां कर्तृकारके।
तुल्यार्थयोगे षष्ठीस्यात् तृतीया च विभाषया।
अधारे च तथा भावे विभक्तिः सप्तमी भवेत्।
अनादरे च निर्द्धारे षष्ठी स्यात् सप्तमी तथा।

*उद्यमेनैव संसिद्धि-*
*र्भाषायां लभते नरः।*
*क्षत्रियश्शस्त्रमापन्नः*
*कथं जयति निस्पृहः?*



# अष्टमोऽध्यायः

## प्रयोगाः

कर्तरिप्रयोगः, कर्मणिप्रयोगः, भावेप्रयोगः इति प्रयोगः त्रिविधः। कर्तरि, कर्मणि, भावे इति शब्दाः कतृ, कर्म, भाव शब्दानां सप्तमी विभक्तौ रूपाणि भवन्ति।

## कर्तरि प्रयोगः

- "प्रयोगे कर्तृवाच्यस्य कर्तरि प्रथमा भवेत्।
  द्वितीया कर्मणि, तथा क्रिया कर्तृपदान्विता।।"
- कर्तरि प्रयोगे कर्ता प्रथमा विभक्तौ, कर्म द्वितीया विभक्तौ च भवतः।

  उदा - दिव्या ईश्वरं नमति। ദിവ്യ ഈശ്വരനെ നമിയ്ക്കുന്നു

- क्रियायाः पुरुषः वचनञ्च कर्तानुसारी भवति। कृदन्तक्रियायाः, विभक्तिः, वचनं लिङ्गञ्च कर्तानुसारी भवति।

उदा - महेशः पुस्तकं लिखति। (तिङन्तम्।)

महेशः पुस्तकं लिखितवान्।

वैदेही मुनिपत्नीं दृष्टवती। (कृदन्तम्।)

वैदेही मुनिपत्नीम् अपश्यत्।

## कर्मणि प्रयोगः

- "प्रयोगे कर्मवाच्यस्य तृतीया स्यात्तु कर्तरि।
  कर्मणि प्रथमा चैव क्रिया कर्मानुसारिणी।।"

कर्मणिप्रयोगे कर्ता तृतीयाविभक्तौ, कर्म प्रथमाविभक्तौ च भवति। क्रिया कर्मानुसारिणी भवति। सकर्मकक्रियाः कर्मणिप्रयोगे प्रयुज्यन्ते। कृदन्तक्रियापदान्यपि कर्मानुसारिणी।

उदा - गिरीशेन पुस्तकानि लिख्यन्ते। (तिङन्तम्)

तेन दृष्टाः समुद्राः। (कृदन्तम्)

# भावेप्रयोगः

- "कर्माभावः सदा भावे तृतीया चैव कर्तरि।
  प्रथमपुरुषश्चैकवचनञ्च क्रियापदे।।"

भावेप्रयोगे कर्ता तृतीया विभक्तौ भवति। कर्म नास्ति। क्रिया सदा प्रथमपुरुषैकवचनान्ता भवति।

| | | |
|---|---|---|
| उदा - | वयं तिष्ठामः। | (कर्तरि) |
| | अस्माभिः स्थीयते। | (भावे) |
| | यूयं विद्वांसः भवत। | (कर्तरि) |
| | युष्माभिः विद्वद्भिः भूयताम्। | (भावे) |

कर्मणि क्रियापदानां निष्पादनम् कथम्? चिन्तयामः

- कर्मणिप्रयोगे भावेप्रयोगे च धातुभिः सह यक् (य) प्रत्ययं योजयति।
- प्रत्ययमिदं धातूनां सार्वधातुकलकारेषु लट्, लङ्, लोट्, विधिलिङ् लकारेषु एव प्रयुङ्क्ते।
- सर्वासु क्रियासु 'य' प्रत्ययानन्तरं आत्मनेपदप्रत्ययानि प्रयुज्यन्ते।
- चुरादिगणं विहाय सर्वेषु गणेषु 'य' प्रत्ययं धातुभिः सह योजयति। चुरादौ 'अय' प्रत्ययस्य लोपे 'य' प्रत्ययं योजयति।

| | | |
|---|---|---|
| उदा - | नी - नीयते। | पच् - पच्यते। |
| | भू - भूयते। | रुद् - रुद्यते। |
| चुरादौ | चुर् - चोरय - चोर्यते। | |
| | भू - भावय - भाव्यते। | |
| | कथ् - कथय - कथ्यते। | |

- आर्धधातुकलकारेषु लिट्, लुट्, लृट्, लृङ्, लुङ्, आशीर्लिङ् आदिषु 'य' प्रत्ययं न योजयति। एषां कर्मणि रूपाणां निष्पादनाय परस्मैपदिषु आत्मनेपदप्रत्ययानि योजयन्ति इति भेदो वर्तते।

उदा - धातु - भू (परस्मै) अकर्मकम्। अनुभू (परस्मै) सकर्मकम्।

| | | भावेप्रयोगः | कर्मणिप्रयोगः |
|---|---|---|---|
| लिट् | - | बभूवे | अनुबभूवे। |
| लुट् | - | भविता | अनुभविता। |
| लृट् | - | भविष्यते | अनुभविष्यते। |
| लृङ् | - | अभविष्यत | अन्वभविष्यत। |
| लुङ् | - | अभावि | अन्वभावि। |
| आशीर्लिङ् | - | भविषीष्ट | अनुभविषीष्ट। |

- कर्मणिप्रयोगे कर्तुः क्रियायाः च मिथः वचनसाम्यं भवेत्। भावेप्रयोगे कर्ता बहुवचने सत्यपि क्रिया प्रथमपुरुषैकवचने एव भवति।

| | | |
|---|---|---|
| उदा - | पुष्पेण विकस्यते। | പുഷ്പം വികസിയ്ക്കുന്നു |
| | पुष्पैः विकस्यते। | പുഷ്പങ്ങൾ വികസിയ്ക്കുന്നു |
| लट् - | बालेन रुद्यते। | ബാലൻ കരയുന്നു |
| | बालैः रुद्यते। | ബാലന്മാർ കരയുന്നു |
| लिट् - | बालेन रुरुदे। | ബാലൻ കരഞ്ഞു |
| | बालै रुरुदे। | ബാലന്മാർ കരഞ്ഞു |
| लुङ् - | बालेन अरोदि। | ബാലൻ കരഞ്ഞു |
| | बालैः अरोदि। | ബാലന്മാർ കരഞ്ഞു |

- आकारान्ताः गा, पा, धा, पा (കുടിയ്ക്കുക), मा, स्था, हा (ത്യജിയ്ക്കുക), आदि धातवः कर्मणि ईकारान्तः भवेयुः।

| | | | |
|---|---|---|---|
| उदा - | गा | പാടുക | गीयते। |
| | दा | കൊടുക്കുക | दीयते। |
| | धा | വയ്ക്കുക | धीयते। |
| | पा | കുടിയ്ക്കുക | पीयते। |

| | | |
|---|---|---|
| मा | അളക്കുക | मीयते। |
| स्था | നില്ക്കുക | स्थीयते। |
| हा | ത്യജിയ്ക്കുക | हीयते। |

- आदेशात् आकारान्तत्वं प्राप्ताः गै, दे, धे, सो, धातवः अपि ईकारान्ताः स्युः।

| | | | |
|---|---|---|---|
| उदा - | गै | പാടുക | गीयते। |
| | दे | രക്ഷിയ്ക്കുക | दीयते। |
| | धे | കുടിയ്ക്കുക | धीयते। |
| | सो | നശിപ്പിയ്ക്കുക | सीयते। |

- शिष्टानाम् आकारान्तधातूनाम् 'आ'कारः कर्मणि तथैव तिष्ठति।
- ईकारान्त, उकारान्त धातूनां स्वरेषु दीर्घः स्यात्।

उदा - जि - जीयते। स्तु - स्तूयते।

- ए, ऐ, ओ, औ स्वरान्तधातवः अपि आकारान्तवत् भवन्ति।

| | | | |
|---|---|---|---|
| उदा - | दै | ശുചിയാക്കുക | दायते। |
| | ध्यै | ധ്യാനിയ്ക്കുക | ध्यायते। |
| | शो | മൂർച്ചകൂട്ടുക | शायते। |

- 'ऋ'कारान्त धातूनां 'ऋ' कारस्य 'रि' इत्यादेशः स्यात्।

(अपवादः - स्मृ स्मर्यते, स्वृ स्वर्यते।)

उदा - कृ क्रियते। हृ - ह्रियते।

अपवादः - स्मृ - स्मर्यते।

स्वृ - स्वर्यते।

- सम्प्रसारणयुक्तानां धातूनां, संप्रसारणानन्तरं 'य' प्रत्ययं योजयति।

उदा - ग्रह् - गृह्यते। यज् - इज्यते।

वच् - उच्यते। ह्वे - हूयते।

व्यध् - विध्यते। वे - ऊयते।

മധ്യമങ്ങളായ य्, र्, ल्, व् ഇവയ്ക്ക് പകരം യഥാക്രമം इ, ऋ, लृ, उ വരുന്നതിന് സംപ്രസാരണം എന്നു പറയുന്നു. इग्यणः सम्प्रसारणम्। यणः स्थाने इकः आगमनम् सम्प्रसारणम्।

- अनुनासिकयुक्तेषु धातुषु अनुनासिकलोपानन्तरं 'य' प्रत्ययं योजयति।

उदा - रञ्ज् - रज्यते। ग्रन्थ् - ग्रथ्यते।

एवम् - अञ्च्, अञ्ज्, भञ्ज्, सञ्ज्, स्वञ्ज्, मन्थ्, उन्द्, स्कन्द्, स्पन्द्, स्यन्द्, इन्ध्, बन्ध्, दंभ्, स्तंभ्, दंश्, भ्रंश्, स्रंस्, तृंह्, धातूनामपि अनुस्वारस्य लोपः स्यात्।

किन्तु - वन्द्, नन्द्, निन्द् प्रभृतिषु धातुषु इदि त्सु अनुनासिकस्य लोपः नास्ति

उदा - वन्द् - वन्द्यते। निन्द् - निन्द्यते।

- जन् ജനിയ്ക്കുക, खन् കുഴിയ്ക്കുക, तन् വിരിയ്ക്കുക, सन् കൊടുക്കുക धातूनाम् अनुनासिकस्य लोपः विकल्पेन स्यात्। लोपे सति धातोः 'अ' कारस्य दीर्घः स्यात्।

| | | | |
|---|---|---|---|
| उदा - जन् | - | जन्यते | जायते। |
| खन् | - | खन्यते | खायते। |
| तन् | - | तन्यते | तायते। |
| सन् | - | सन्यते | सायते। |

- ऊह् धातोः उपसर्गयोगे 'उह्' इति स्यात्।

उदा - ऊह् - ऊह्यते।

समूह् (सं + ऊह्) - समूह्यते।

- अज् പോവുക, अस् ആവുക, घस् തിന്നുക, चक्ष् പറയുക, ब्रू പറയുക, एषां धातूनां कर्मणिप्रयोगाय यथाक्रमं वी, भू, अद्, ख्या, वच्, धातवः आदेशाः स्युः।

उदा - अज् - वीयते। अस् - भूयते।

घस् - अद्यते। चक्ष् - ख्यायते।

ब्रू (वच्) - उच्यते।

- अस् (अस् क्षेपणे എറിയുക) इत्यर्थे अस्यते इति रूपम्।
- शास् (शासु अनुशिष्टौ പഠിപ്പിയ്ക്കുക) 'शिस्' इति कृत्वा प्रत्ययं योजयति।

शास् - शिष्यते।

शी കിടക്കുക शय्यते। (भावे)

श्वि പോവുക, വർദ്ധിയ്ക്കുക शूयते। (भावे)

- **प्रवर्तनम्**

| | ***कर्तरिप्रयोगः*** | ***कर्मणिप्रयोगः*** | ***भावेप्रयोगः*** |
|---|---|---|---|
| 1. | गणेशः सूर्यं पश्यति। | ........................ | ........................ |
| 2. | ........................ | राज्ञा जनाः रक्ष्यन्ते। | ........................ |
| 3. | ........................ | ........................ | भक्तेन पूज्यते। |
| 4. | मृगः जलं पिबति। | ........................ | ........................ |
| 5. | ........................ | आचार्येण शिष्यः उपदिश्यते। | ........................ |
| 6. | ........................ | ........................ | बालकैः पठ्यते। |
| 7. | ........................ | ........................ | कुलालेन क्रियते। |
| 8. | दरिद्रः प्रभुं याचते | ........................ | ........................ |
| 9. | ........................ | अग्निना वनं दह्यते | ........................ |
| 10. | ........................ | मात्रा धर्म उपदिश्यते | ........................ |
| 11. | राजा रिपुं जयति | ........................ | ........................ |
| 12. | पान्थः भारं वहति | ........................ | ........................ |
| 13. | ........................ | सेवकेन प्रासादः रक्ष्यते | ........................ |
| 14. | पुत्रः पयः पिबति | ........................ | ........................ |
| 15. | ........................ | अश्वाभ्यां रथः उह्यते | ........................ |
| 16. | ........................ | तृषितैः जलं पीयते | ........................ |

| | | | |
|---|---|---|---|
| 17. | चित्रकारः चित्रं लिखति | ........................ | ........................ |
| 18. | सूर्यः प्रकाशते | ........................ | ........................ |
| 19. | मयूरः नृत्यति | ........................ | ........................ |
| 20. | सेवकः वहति | ........................ | ........................ |
| 21. | पुरुषः जीवति | ........................ | ........................ |
| 22. | कन्याः रमन्ते | ........................ | ........................ |
| 23. | वामनो बलिं वसुधां याचते | ........................ | ........................ |
| 24. | सूतः तण्डूलान् ओदनं पचति | ........................ | ........................ |
| 25. | नृपो गर्गान् शतं दण्डयति | ........................ | ........................ |
| 26. | माणवकः पन्थानं पृच्छति | ........................ | ........................ |
| 27. | ........................ | प्रारभ्यते न खलु विघ्नभयेन नीचैः | ........................ |
| 28. | ........................ | निष्का समर्थ्येभ्यो दीयन्ते | ........................ |

# नवमोऽध्यायः

## समासः

### समासः कः ?

समसनं समासः। समसनं नाम पृथक् स्थितानां पदानां मेलनेन एकपदत्वम्।

यथा - रामस्य पत्नी - रामपत्नी।

लतायाः पुत्रः - लतापुत्रः।

### समासः किमर्थः ?

अल्पेन समयेन अल्पेन पदेन च अधिकस्य अर्थस्य बोधनं समासस्य लाभः। अनेन पदसौन्दर्यं वर्धते।

### समासः केषाम् ?

समासः सुबन्तानाम् एव अधिकतया भवति। अर्थात् नामपदानाम्। पदयोः (पदानां वा) परस्परबन्धेन विशिष्टैकार्थबोधकत्वं यत्र तत्रैव समासः भवति।

उदा - राज्ञः पुत्रः - राजपुत्रः।

अत्र राज्ञः पुत्रस्य च <u>पितृपुत्रसम्बन्धः</u> वर्तते।

| राज्ञः | पुत्रः |
|---|---|
| पूर्वपदम् | उत्तरपदम् |
| (ആദ്യത്തേത്) | (അനന്തരമുള്ളത്) |

अर्थात् पूर्वपदस्य उत्तरपदस्य च परस्परसम्बन्धः आवश्यकः इत्यर्थः।

### समासप्रकाराः (भेदाः)

समासः पञ्चधा।

1. तत्र विशेषसंज्ञाविनिर्मुक्तः 'केवलसमासः' प्रथमः।

यथा - पूर्वं भूतः भूतपूर्वः इति। एवं श्रुतपूर्वदृष्टपूर्वादयः। श्रुतपूर्वेयं कथा, पठितपूर्वोयं श्लोकः।

श्रीमान् अच्युतमेनोन् केरलस्य भूतपूर्वः मुख्यमन्त्री।

२. तत्पुरुषः।

३. बहुव्रीहिः।

४. द्वन्द्वः।

५. अव्ययीभावः।

- अधोदत्तात् रेखाचित्रात् समासभेदान् विशदरूपेण अवगच्छन्तु।




## २. तत्पुरुषसमासः।

प्रायः उत्तरपदार्थप्रधानः तत्पुरुषः। अस्मिन् उत्तरपदार्थस्य प्राधान्यं भवति। क्रियया सह उत्तरपदस्य एव अन्वयः भवति।

यथा - मन्त्रिपुत्रः गच्छति। मन्त्रिणः पुत्रः मन्त्रिपुत्रः।

अत्र 'मन्त्रिन्' शब्दः पूर्वपदम्। 'पुत्र' शब्दः उत्तरपदम्। गच्छति इति क्रियायां पुत्रशब्दस्य एव अन्वयः न तु मन्त्रिशब्दस्य। अतः अत्र उत्तरपदस्य प्रधानता वर्तते।

तत्पुरुषसमासः अष्टधा।

प्रथमा - द्वितीया - तृतीया - चतुर्थी - पञ्चमी - षष्ठी - सप्तमी - कर्मधारयभेदात्।

| | | | | |
|---|---|---|---|---|
| उदा - | अर्धं | ग्रामस्य | अर्धग्रामः | प्रथमातत्पुरुषः। |
| | नगरं | गतः | नगरगतः | द्वितीयातत्पुरुषः। |
| | नखैः | भिन्नः | नखभिन्नः | तृतीयातत्पुरुषः। |
| | शिशवे | हितम् | शिशुहितम् | चतुर्थीतत्पुरुषः। |
| | सिंहात् | भयम् | सिंहभयम् | पञ्चमीतत्पुरुषः। |
| | वृक्षस्य | मूलम् | वृक्षमूलम् | षष्ठीतत्पुरुषः। |
| | कार्ये | तत्परः | कार्यतत्परः | सप्तमीतत्पुरुषः। |

**अभ्यासः**

- अधोदत्तानां समस्तरूपं लिखित्वा समासनिर्णयं करोतु।

1. पूर्वं कायस्य ........................... ...........................
2. कालिदासेन कृतम् ........................... ...........................
3. विद्यालयं प्राप्तः ........................... ...........................
4. ईश्वराय अर्पणम् ........................... ...........................
5. व्याघ्रात् भयम् ........................... ...........................
6. शास्त्रे पण्डितः ........................... ...........................
7. मृगाणां राजा ........................... ...........................

**कर्मधारयतत्पुरुषः**

(तत्पुरुषः समानाधिकरणः कर्मधारयः।) कर्मधारयः सप्तविधः भवति।

1. **विशेषणपूर्वपदः**

उत्तरपदस्य विशेषणरूपेण पूर्वपदं यत्र भवति तत्र अयं समासः।

यथा - नीलः मेघः - नीलमेघः।

अत्र उत्तरपदस्य मेघशब्दस्य विशेषणं 'नील' इति शब्दः।

अतः अत्र विशेषणपूर्वपदनामकः समासः।

**2. विशेषणोत्तरपदः**

उत्तरपदं यत्र विशेषणत्वेन वर्तते तत्र एषः समासः।

यथा - वैयाकरणः खसूचिः - वैयाकरणखसूचिः।

**3. विशेषणोभयपदः**

पूर्वपदम् उत्तरपदं च विशेषणत्वेन यत्र वर्तते तत्र अयं समासः।

यथा - शीतम् उष्णम् - शीतोष्णम्।

**4. उपमानपूर्वपदः**

उपमानं पूर्वपदे यत्र अस्ति तत्रैव अयं समासः भवति।

यथा - मेघ इव श्यामः - मेघश्यामः।

अत्र उपमानरूपी इव शब्दः पूर्वपदे विद्यते।

**5. उपमानोत्तरपदः**

उपमानं यदि उत्तरपदे भवति तर्हि उपमानोत्तरपदः।

यथा - नरः व्याघ्रः इव - नरव्याघ्रः।

**6. अवधारणपूर्वपदः**

अत्र विशेषणशब्दात् परम् 'एव' शब्दः दृश्यते।

यथा - विद्या एव धनम् - विद्याधनम्।

**7. सम्भावनापूर्वपदः**

पूर्वपदस्योपरि सम्भावना अत्र क्रियते। पूर्वपदस्थाने संज्ञाशब्दः भवति। तत्परम् 'इति' इति पदं प्रयुज्यते।

यथा - आम्रः इति वृक्षः - आम्रवृक्षः।

**अभ्यासः**

- अधोदत्तानां समस्तपदं लिखित्वा 'कः समासः' इति लिखतु।

1. नीलम् उत्पलम् ....................... .......................।
2. उन्नतः पर्वतः ....................... .......................।
3. गमनम् आगमनम् ....................... .......................।
4. पीतम् अपीतम् ....................... .......................।
5. जलम् इव निर्मलम् ....................... .......................।
6. पुष्पम् इव सुन्दरम् ....................... .......................।
7. मुखं कमलम् इव ....................... .......................।
8. छात्रः अध्यापकः इव ....................... .......................।
9. आचार्यः एव देवः ....................... .......................।
10. शीलम् एव धनम् ....................... .......................।
11. काशी इति नगरी ....................... .......................।
12. केरलम् इति देशः ....................... .......................।
13. द्विगुणितं शतम् ....................... .......................।

**द्विगुसमासः**

समासेऽस्मिन् पूर्वपदं 'सङ्ख्याशब्दः' भवति। (न सर्वत्र) द्विगुसमासः त्रिधा विभज्यते।

1. समाहारद्विगुः। 2. तद्धितार्थद्विगुः। 3. उत्तरपदद्विगुः।

**1. समाहारद्विगुः**

त्रयाणां लोकानां समाहारः - त्रिलोकी।

**2. तद्धितार्थद्विगुः**

षण्णां मातॄणाम् अपत्यम् - षाण्मातुरः।

**3. उत्तरपदद्विगुः**

दश गावः धनं यस्य सः दशगवधनः।

**अभ्यासः**

- 'समासः' कः ? इति निर्णयं करोतु।

1. पञ्च गावः धनं यस्य सः ....................... .......................।
2. चतुर्णां युगानां समाहारः ....................... .......................।
3. नवानां रात्रीणां समाहारः ....................... .......................।

**नञ् समासः**

नञ् प्रभृतयः समासः पञ्च भवन्ति।

**1. नञ्**

न धर्मः - अधर्मः।

न सन्देहः - असन्देहः।

न विघ्नः - अविघ्नः।

न विवादः - अविवादः।

**2. कुसमासः**

कुत्सितः पुरुषः - कुपुरुषः / कापुरुषः।

**3. गतिसमासः**

पटपटा इति शब्दं कृत्वा - पटपटाकृत्य।

आदरं कृत्वा - सत्कृत्य।

पुरस्कारं कृत्वा - पुरस्कृत्य।

**4. प्रादिसमासः**

गतः आचार्यः - प्राचार्यः।

**5. उपपदसमासः**

कुम्भं करोति इति - कुम्भकारः।

निशां करोति इति - निशाकरः।

भयं करोति इति - भयङ्करः।

**अभ्यासः**

- अधोदत्तानां पदानां समाससनिर्णयं करोतु।

1. अब्राह्मणः ................................।
2. प्रियंवदः ................................।
3. शास्त्रकारः ................................।

## ३. बहुव्रीहिः।

प्रायेण अन्यपदार्थप्रधानः बहुव्रीहिः। अर्थात् पूर्वपदस्य उत्तरपदस्य वा अत्र प्राधान्यं न भवति।

अस्य भेदद्वयम् 1. सामान्यबहुव्रीहिः। 2. विशेषबहुव्रीहिः।

**1. सामान्यबहुव्रीहिः।**

सामान्यः षोढ़ा विभज्यते।

1. द्वितीयार्थबहुव्रीहिः - प्राप्तम् उदकं यं सः
   प्राप्तोदकः (ग्रामः)।
2. तृतीयार्थबहुव्रीहिः - कृतं कार्यं येन सः
   कृतकार्यः (पुरुषः)।
3. चतुर्थ्यर्थबहुव्रीहिः - दत्तं धनं यस्मै सः
   दत्तधनः (कोऽपि जनः)।
4. पञ्चम्यर्थबहुव्रीहिः - आनीतः तण्डुलः यस्मात् सः
   आनीततण्डुलः (आपणः)।
5. षष्ठ्यर्थबहुव्रीहिः - कठिनं हृदयं यस्य सः
   कठिनहृदयः (जनः)।

6. सप्तम्यर्थबहुव्रीहिः - बहूनि पर्णानि यस्मिन् सः
बहुपर्णः (वृक्षः)।

**2. विशेषबहुव्रीहिः।**

विशेषः नवविधः।

1. व्यधिकरणः - चन्द्रः मौलौ यस्य सः चन्द्रमौलिः (शिवः)।
विषं कण्ठे यस्य सः विषकण्ठः।

2. सङ्ख्योत्तरपदः - दशानां समीपे ये सन्ति ते - उपदशाः
विंशतेः समीपे ये सन्ति ते - उपविंशाः (जनाः)

3. सङ्ख्योभयपदः - त्रयः वा चत्वारः वा - त्रिचतुराः।
पञ्च वा षट् वा - पञ्चषाः।

4. सहपूर्वपदः - पुस्तकेन सह वर्तते इति - सपुस्तकः।
कर्मणा सह वर्तते इति - सकर्मकः।

5. व्यतिहारलक्षणः - दण्डैः दण्डैः प्रहृत्य इदं युद्धं प्रवृत्तं दण्डादण्डि।
केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि।

6. दिगन्तराललक्षणः - पूर्वस्याः उत्तरस्याः च दिशो यदन्तरालं - पूर्वोत्तरा।

7. नञ् बहुव्रीहिः - अविद्यमानम् अपत्यं यस्य सः अनपत्यः।
अविद्यमानः पुत्रः यस्य सः अपुत्रः।

8. प्रादिबहुव्रीहिः - निर्गता दया यस्मात् सः निर्दयः।
निर्गता करुणा यस्मात् सः निष्करुणः।

9. उपमानपूर्वपदः - वानरमुखम् इव मुखं यस्य सः वानरमुखः।
शुकमुखम् इव मुखं यस्य सः शुकमुखः।

**अभ्यासः**

- अधोलिखितानां समस्तपदानां समासनिर्णयं करोतु -

1. श्वेताम्बरः ................................।
2. बहुफलः ................................।

3. शङ्खपाणिः ................................।

4. उपशताः ................................।

5. द्वित्राः ................................।

6. सधनः ................................।

7. निष्कृपः ................................।

8. गजाननः ................................।

9. चक्रपाणिः ................................।

10. उपसहस्राः ................................।

## ४. द्वन्द्वः।

उभयपदार्थप्रधानः द्वन्द्वः।

द्वन्द्वसमासः द्विधा। 1. इतरेतरः 2. समाहारः च।

### 1. इतरेतरः

अस्यापि भेदद्वयम्। द्विपदद्वन्द्वः, बहुपदद्वन्द्वः च।

**द्विपदद्वन्द्वः** - गोपालश्च माधवश्च - गोपालमाधवौ।

**बहुपदद्वन्द्वः** - कविश्च रविश्च रामश्च - कविरविरामाः।

### 2. समाहारः

समाहारद्वन्द्वस्य भेदद्वयम्।

1. समाहारः, 2. नित्यसमाहारश्च।

**समाहारः** - घटश्च पटश्च अनयोः समाहारः - घटपटम्/घटपटौ वा।

**नित्यसमाहारः** - काकश्च उलूकश्च अनयोः समाहारः - काकोलूकम्।

(पाणिपादम्, अहिनकुलम् एते अपि)

**अभ्यासः**

- अधोलिखितानां समासनामानि लिखतु।

1. पाणिपादम् ................................।
2. रामकृष्णौ ................................।
3. संज्ञापरिभाषम् ................................।
4. लवकुशौ ................................।
5. ब्रह्मविष्णुमहेश्वराः ................................।

## ५. अव्ययीभावः।

प्रायेण पूर्वपदार्थप्रधानः अव्ययीभावः।

यथा - कृष्णस्य समीपम् उपकृष्णम्।

रामस्य समीपम् उपरामम्। (समीपार्थे)

**कानिचन उदाहरणानि**

| | | |
|---|---|---|
| विघ्नानाम् अभावः | अविघ्नम्। | (अभावार्थे अव्ययीभावः, असन्देहः - सन्हेहाभावे तत्पुरुषः) |
| रूपस्य योग्यम् | अनुरूपम्। | (योग्यतार्थे) |
| कार्यं कार्यं प्रति | प्रतिकार्यम्। | (वीप्सार्थे) |
| शक्तिम् अनतिक्रम्य | यथाशक्ति। | (पदार्थानतिवृत्तिः) |
| आ मुक्तेः | आमुक्ति संसारः (മോക്ഷംവരെ ലോകസുഖം) | (मर्यादार्थे) |
| आ हिमालयात् | आहिमालयम्। (ഹിമാലയംവരെ) | (अभिविध्यर्थे) |
| अग्निं प्रति | प्रत्यग्नि (അഗ്നിയോട്) | (आभिमुख्यार्थे) |

| | | |
|---|---|---|
| शाकस्य लेशः | शाकप्रति। | (मात्रार्थे) / (परिमाणम्) |
| यावन्ति नामानि | यावन्नामम् | |
| गङ्गायाः पारे<br>(गङ्गपारम् इत्यपि) | पारेगङ्गम् | (पारेशब्दयुक्तः) |
| नगरस्य मध्ये<br>(नगरमध्यम् इत्यपि) | मध्येनगरम्<br>(सूत्रम् - पारे मध्ये षष्ठ्या वा) | (मध्येशब्द युक्तः) |
| द्वयोः यमुनयोः समाहारः | द्वियमुनम् | |

**अभ्यासः**

- अधोलिखितानि समस्तपदानि कस्मिन् अर्थे भवन्ति इति जानातु।

1. पारेयमुनम्। ................................।
2. आकन्याकुमारि। ................................।
3. प्रतिविषयम्। ................................।
4. यथामति। ................................।
5. यावत्कार्यम्। ................................।
6. मध्येग्रामम्। ................................



- द्वन्द्वः
  - इतरेतरः
    - द्विपदद्वन्द्वः
    - बहुपदद्वन्द्वः
  - समाहारः
  - नित्यसमाहारः

# दशमोऽध्यायः

## वृत्तानि।

वृत्तानि द्विविधानि - वर्णवृत्तानि मात्रावृत्तानि च। प्रतिपादं वर्णानां निश्चिता व्यवस्था अस्ति चेत् तस्य वर्णवृत्तमिति नाम। प्रतिपादं 'मात्राणां' नियतव्यवस्था वर्तते चेत् तस्य मात्रा - वृत्तमिति च नाम भवति। अत्र 'वर्णम्' इति शब्देन केवलं स्वरा एव ग्राह्या।

सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः।
वा पादान्ते गुरुर्ज्ञेयो द्विमात्रो मात्रिको लघुः।।

अनुस्वारसहिताः, विसर्गान्तस्थाः, संयुक्ताक्षरयुक्ताः लघवः, दीर्घाक्षराः च 'गुरुः' भवन्ति। पादावसानस्थवर्णः विकल्पेन गुरुः भवति। गुरोः मात्राद्वयम्। गुरुः ऋजुरेखया (—) चिह्न्यते। अनुस्वार, विसर्ग, संयुक्ताक्षररहिताः ह्रस्वाः 'लघु' भवन्ति। लघोः एका मात्रा। सा वक्ररेखया अङ्क्यते (∪)।

वृत्तानां लक्षणकथनसौकर्यार्थं, वर्णान् गण रूपेण विभजते। एवं त्रयाणां वर्णानां समाहारः एकः गणः भवति। आहत्य अष्ट गणा सन्ति।

'आदिमध्यावसानेषु यरता यान्ति लाघवम्।
भजसा गौरवं यान्ति मनौ तु गुरुलाघवौ।।"

| | नाम | स्वरूपम् | चिह्नम् |
|---|---|---|---|
| 1. | यगणः | आदिलघुः | ∪ — — |
| 2. | तगणः | अन्तलघुः | — — ∪ |
| 3. | जगणः | मध्यगुरुः | ∪ — ∪ |
| 4. | मगणः | सर्वगुरुः | — — — |
| 5. | रगणः | मध्यलघुः | — ∪ — |
| 6. | भगणः | आदिगुरुः | — ∪ ∪ |
| 7. | सगणः | अन्तगुरुः | ∪ ∪ — |
| 8. | नगणः | सर्वलघुः | ∪ ∪ ∪ |

प्रायेण वृत्तलक्षणानुसारमेव वृत्तानां लक्षणवाक्यानि अपि भवन्ति। श्लोकेषु विश्रमस्थानं (पदच्छेदकरणाय युक्तं स्थानं) 'यति'माहु बुधाः।

श्लोकेषु सामान्येन चत्वारः पादाः सन्ति। प्रथमद्वितीयपादयोः पूर्वार्धम् इति नाम। तृतीयचतुर्थपादयोः उत्तरार्धमिति च नाम। पूर्वार्धपादयोः मिथः, तथा उत्तरार्धपादयोः मिथः च सन्धिः वर्तते। परं पूर्वार्धस्य उत्तरार्धस्य च मिथः सन्धि न विद्यते। प्रथमतृतीयपादयोः विषमपादाविति, द्वितीयचतुर्थपादयोः समपादाविति च नामान्तरमस्ति।

## प्रवर्तनम्।

- प्रदत्तानां पदानां गणनिर्णयं करोतु।

ज

U — U

उदा - फलानि। - फलानि।

| | | | | | |
|---|---|---|---|---|---|
| नयनम् | मलिनम् | कुक्कुटः | अश्वत्थः | रराज | राजेन्द्रः |
| नृपतिः | वानरः | बभूव | कृष्णेन | अबला | रावणः |
| कुलशम् | संग्रामः | आहवः | अनृतम् | निमित्रम् | अपत्यम् |
| कुटुम्बम् | कवचम् | ददाति | उत्पलम् | कुण्डलम् | बिडालः |
| अटवी | सहस्रम्। | | | | |

## वृत्तभेदाः

समम्, अर्धसमं, विषमम् इति वृत्तं त्रिविधमस्ति। चतुर्णां पादानामपि लक्षणं समं चेत् तत् समवृत्तं भवति। प्रथमतृतीयपादयोः लक्षणं द्वितीयचतुर्थपादयोः लक्षणभिन्नं चेत् तत् अर्धसमवृत्तमिति कथयति। चतुर्णामपि पादानां लक्षणानि भिन्नानि चेत् तत् विषमं वृत्तं भवति।

- श्लोकलक्षणरहितानि पादयुक्तानि च पद्यानि 'गाथा' इति व्यपदिश्यते।

गद्यं पद्यं चेति द्विविधं काव्यम्।

अपादः पदसङ्घातः गद्यम्।

पद्यं चतुष्पदी।

पद्ये च्छन्दश्शास्त्रमनुसृत्य केचन नियमाः विद्यन्ते। तान् वृत्तशास्त्रनियमान् संगृह्य पठामः।

आशयसम्पूर्णः एकश्लोकः भवति मुक्तकम्।

उदा -

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता चराचरचमूः रामाय तस्मै नमः।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्रलयः सदा भवतु मे हे राम! मामुद्धर।।

प्रायेण श्लोके एको वा द्वौ वा पूर्णौ आशयौ भवेयुः। किन्तु, द्वयोः श्लोकयोः साहाय्येन एव एकस्यापि पूर्णाशयस्य पूर्तिः भवति तर्हि तद् 'युग्मकम्' इत्युच्यते। त्रिभिः श्लोकैः एव अर्थपूर्तिः भवति तर्हि तत् 'विशेषक'मिति कथ्यते। चतुर्भिः श्लोकैः चेत् तस्य 'कलापक'मिति नाम। चतुर्भ्योऽधिकैः श्लोकैः आशयपूर्तिः यत्र भवति तत्र 'कुलक'मित्युच्यते।

## च्छन्दांसि

पादेषु एकाक्षरात् प्रभृति षड्विंशति (26) अक्षरपर्यन्तं, 26 च्छन्दांसि विद्यन्ते। अर्थात् श्लोके चतुर्भ्यः आरभ्य (4) चतुरधिकं शतं (104) अक्षरमित्यर्थः। तेषां नामानि यथा -

| | | | |
|---|---|---|---|
| 1. उक्ता | 2. अत्युक्ता | 3. मध्या | 4. प्रतिष्ठा |
| 5. सुप्रतिष्ठा | 6. गायत्री | 7. उष्णिक् | 8. अनुष्ठुप् |
| 9. बृहती | 10. पङ्क्तिः | 11. त्रिष्टुप् | 12. जगती |
| 13. अतिजगती | 14. शक्वरिः | 15. अतिशक्वरिः | 16. अष्टिः |
| 17. अत्यष्टिः | 18. धृतिः | 19. अतिधृतिः | 20. कृतिः |
| 21. प्रकृतिः | 22. आकृतिः | 23. विकृतिः | 24. संकृतिः |
| 25. अभिकृतिः | 26. उत्कृतिः। | | |

एतादृशेषु छन्दस्सु प्रत्येकं लघुगुरुभेदेन अनेकानि वृत्तानि भवन्ति।

- षड्विंशत्यधिकाक्षरयुक्ताः पादाः 'दण्डकानि' भवन्ति।
- आर्यागीतीत्यादीनि मात्रावृत्तानि भवन्ति।

मात्रावृत्तेषु प्रत्येकं गणस्य चतस्रः मात्राः विद्यन्ते। लघोः एका मात्रा, गुरोः द्वे मात्रे च। एवं चतसृषु मात्रासु पञ्चगणाः विद्यन्ते। एषां गणानां प्रत्येकं नामानि न विद्यन्ते।

1. सर्वे लघवः — U U U U
2. सर्वे गुरवः — — — — —
3. आदिगुरुः शिष्टौ लघू — — U U
4. आदौ अन्ते च लघुः, मध्ये गुरुः — U — U
5. प्रथमद्वितीयौ लघू अन्त्यो गुरुः — U U —

तृतीयचतुर्थपञ्चमाः भगण जगण सगणवत् भवन्ति।

## दण्डकम्

ഓരോ പാദങ്ങളിലും 26 അക്ഷരംവരെയുള്ളവയെ ഛന്ദസ്സുകളെന്നും, അവയിൽ കൂടുതലുള്ളവയെ ദണ്ഡകങ്ങൾ എന്നും പറയുന്നു.

27 അക്ഷരം മുതൽ 999 വരെ അക്ഷരപാദമുള്ള ദണ്ഡകങ്ങളുണ്ട്. മുമ്മൂന്ന് അക്ഷരങ്ങളുടെ വൃദ്ധിയോടെയാണിവ.

2, 4 അക്ഷരങ്ങളുടെ വൃദ്ധി ഇല്ല. വേറൊരർത്ഥത്തിൽ അക്ഷരങ്ങൾ മൂന്നിന്റെ ഗുണിതങ്ങളായിരിക്കണം.

एकोनसहस्राक्षरपर्यन्ता दण्डकाङ्घ्रयः प्रोक्ताः।
वर्णत्रिकगणवृद्ध्या न द्वितयाद्या महामतिभिः।।

चण्डवृष्टिप्रयातम् (प्रतिपादं 27 अक्षराणि)

## लक्षणम् -

यदिह नयुगलं ततस्सप्तरेफास्तदा चण्डवृष्टिप्रयातो भवेद्दण्डकः।

ആദ്യം 2 नगण വും തുടർന്ന് 7 रगण ഉം പ്രതിപാദം വന്നാൽ ചണ്ഡവൃഷ്ടി പ്രയാതം എന്ന ദണ്ഡകം.

उद - इहहि भवति दण्डकारण्यदेशेस्थितिः पुण्यभाजां मुनीनां मनोहारिणां
त्रिदशविजयि वीर्य दृप्यद्दशग्रीव लक्ष्मी विरामेण रामेण संसेविते।
जनकयजनभूमिसम्भूतसीमन्तिनी सीम सीतापदस्पर्शपूताश्रमे
भुवननमितपादपद्माभिधानाम्बिका तीर्थयात्रागतानेकसिद्धाकुले।।

## आर्या

यस्याः प्रथमे पादे द्वादशमात्रास्तथा तृतीयेऽपि।

अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या।।

രണ്ടും മൂന്നും പാദങ്ങളിൽ 12 മാത്രകൾ വീതവും രണ്ടിൽ 18 മാത്രകളും നാലിൽ 15 മാത്രകളും ഉള്ളത് ആര്യാവൃത്തം.

उदा - पथ्याशी व्यायामी

स्त्रीषु जितात्मा नरो न रोगी स्यात्।

यदि मनसा वचसा वा

द्रुह्यति नित्यं न भूतेभ्यः।।

ഹിതമായത് ഭക്ഷിയ്ക്കുന്നവനും വ്യായാമം ചെയ്യുന്നവനും ജിതേന്ദ്രിയനുമായ മനുഷ്യൻ മനസ്സുകൊണ്ടോ വാക്കുകൊണ്ടോ മറ്റു ജീവജാലങ്ങളെ ദ്രോഹിക്കുന്നില്ലെങ്കിൽ രോഗിയാകുന്നില്ല.

## अनुष्टुप्

पञ्चमं लघु सर्वत्र

सप्तमं द्वि चतुर्थयोः।

षष्ठं गुरु विजानीया-

देतच्छ्लोकस्य लक्षणम्।।

ഓരോ പാദത്തിലും 8 അക്ഷരംവീതം. എല്ലാ പാദങ്ങളിലും 5-ാമത്തെ അക്ഷരം ലഘു. 6-ാമത്തെ അക്ഷരം ഗുരു. 2, 4 പാദങ്ങളിൽ 7-ാമത്തെ അക്ഷരം ലഘു. ഈ വൃത്തത്തിന് അനുഷ്ടുപ്, പദ്യം, ശ്ലോകം എന്നീ പേരുകളുണ്ട്.

ल गु

रामोपि सह वैदेह्या

ल गुल

वने वन्येन वर्तयन्।

ल गु

चचार सानुजः शान्तो

ल गु ल

वृद्धेक्ष्वाकुव्रतं युवा।।

## इन्द्रवज्रा

**स्यादिन्द्रवज्रा यदि तौ जगौ गा।**

प्रतिपादं तगणद्वयं ततः जगणः गुरू च क्रमेण भवति चेत् इन्द्रवज्रा नाम वृत्तं स्यात्।

उदा - त त ज

— — ∪ — — ∪ ∪—∪ गु गु
पद्भ्याम/वष्टभ्य / महीमु/भाम्यां
सद्यः समुत्तम्भितपूर्वकायः
सिंहः करीन्द्राक्रमणे प्रवृत्त-
स्तस्थौ तथा कृत्रिमसिंहकल्पः।।

## उपेन्द्रवज्रा

**उपेन्द्रवज्रा जतजास्ततोगौ।**

उदा - ∪ — ∪ — — ∪ ∪— ∪ ग ग
स रोहि/णीसूनु/निबद्ध / रागः
सतां शरण्यस्तमसोऽपहर्ता।
मनोहरो बाल इवौषधीशो
दिने दिने पोषमियाय शौरिः।।

## उपजातिः

**अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।**

ഇന്ദ്രവജ്രാ, ഉപേന്ദ്രവജ്രാ പാദങ്ങൾ കലർന്ന വൃത്തത്തിന് 'ഉപജാതി' എന്ന പേര്.

उदा - न चोरहार्यं न च राजहार्यं
न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनात्प्रधानम्।।

अस्मिन् श्लोके प्रथम तृतीयपादौ उपेन्द्रवज्रा, द्वितीयचतुर्थपादौ इन्द्रवज्रा च भवति।

## वंशस्थम्

**जतौ तु वंशस्थ मुदीरितं जरौ।**

उदा - ज त ज र

U–U– – U U–U –U–
महेश्व/रे वा ज/गताम/धीश्वरे

जनार्दने वा जगदन्तरात्मनि।

न वस्तुभेदप्रतिपत्तिरस्ति मे

तथापि भक्तिस्तरुणेन्दुशेखरे।।

## वसन्ततिलकम्

**उक्तं वसन्ततिलकं तभजा जगौगः।**

उदा - त भ ज ज

– – U – UU U – U U–U ग ग
प्रीणाति / यः सुच/रितैः पि/तरं स/पुत्रो

यद् भर्तुरेव हितमिच्छति तत् कलत्रम्।

तन्मित्रमापदि सुखे च समक्रियं य-

देतत्त्रयं जगति पुण्यकृतो लभन्ते।।

## रथोद्धता

**रान्नरविह रथोद्धता लगौ।**

उदा - रम्यनर्मकलभोगतर्जनी

भ्रूलतेवतरलाऽरियोषितम्।

वैजयन्त्यभिमुखी रणे रणे

भाति ते नरपते रथोद्धता।।

ഹേ നരപതേ! യുദ്ധാഭിമുഖവും രഥത്തിൽ ഉയർന്ന് നില്ക്കുന്നതുമായ കൊടിക്കൂറ, ശത്രുസ്ത്രീകളുടെ മനോഹരമായ നർമ്മഭാഷണം, സുഖഭോഗം മുതലായവയെ തട യുവാൻ അങ്ങ് പുരികക്കൊടികളിളക്കി ആംഗ്യം കാട്ടുന്നതുപോലെ ശോഭിയ്ക്കുന്നു.

## द्रुतविलम्बितम्

**द्रुतविलम्बितमाह नभौ भरौ।**

उदा - इतरपापफलानि यथेच्छया
विलिख तानि सहे चतुरानन!।
अरसिकेषु कवित्वनिवेदनं
शिरसि मा लिख, मा लिख, मा लिख।।

## भुजङ्गप्रयातम्

**भुजङ्गप्रयातं भवेच्चैश्चतुर्भिः।**

उदा - पुरः साधुवत् भाति मिथ्या विनीतः
परोक्षे करोत्यर्थ नाशं हताशः।
भुजङ्गप्रयातोपमं यस्य चित्तं
त्यजेत्तादृशं दुश्चरित्रं कुमित्रम्।।

## मालिनी

**न न म य य युतेयं मालिनी भोगिलोकैः।**

उदा - अतुलितबलधामं स्वर्णशैलाभदेहं
दनुजनवकृशानुं ज्ञानिनामग्रगण्यम्।
सकलगुणनिधानं वानराणामधीशं
रघुपतिवरदूतं वातजातं नमामि।।

## मन्दाक्रान्ता

**मन्दाक्रान्ताम्बुधि रसनगैर्मो भनौ तौ गुरू चेत्।**

उदा - नानाश्लेषप्रकरण चणाचारुवर्णोजद्वलाभा
नानाभावा कलितरसिकश्रेणिकान्तान्तरङ्गा।
मुग्धस्निग्धैमृदुमृदुपदैः क्रीडमाना पुरस्तान्-
मन्दाक्रान्ता भवति कविता कामिनी कौतुकाय।।

## शार्दूलविक्रीडितम्

**सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।**

उदा - रामो नाम बभूव हुं तदबला सीतेति हुं तौ पितु-
वाचा पञ्चवटीवने निवसतस्तामाहरद् रावणः।
कृष्णेनेति पुरातनीं निजकथामाकर्ण्य मात्रेरितां
सौमित्रे क्व धनुर्धनुर्धनुरिति प्रोक्ता गिरः पान्तु वः।।

## पृथ्वी

**जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः।**

उदा - दधच्च भुवनत्रयं महितभाभिराभाकरो
रथेन महताऽनिशं गगनमण्डलं मण्डयन्।
प्रयति रहितः श्रमैर्द्रुतमनूरुसुतो नुतः
सुमेरुभवने सदा स कुरुताच्छिवं श्रीरविः।।

## हरिणी

**नसमरसलागः षड् वेदैर्हयैर्हरिणी मता।**

उदा - सुतनुहृदयात्प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः सम्मोहो मे तदा बलवानभूत्।
प्रबलतमसामेवंप्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया।।

## कुसुममञ्जरी

**रो नरौ नरनराः क्रमेण यदि तत्र सा कुसुममञ्जरी।**

उदा - केशपाशधृतपिञ्छिकावितितिसञ्ज्वलन्मकरकुण्डलं
हारजालवनमालिकाललितमङ्गरागघनसौरभम्।
पीतचेलधृतकाञ्चिकाञ्चितमुदञ्चदंशुमणिनूपुरं
रासकेलिपरिभूषितं तव हि रूपमीश कलयामहे।।



## तोटकम्

**इह तोटकमम्बुधिसैः प्रथितम्।**

उदा - यमुनातटमच्युतकेलिकला
लसदङ्घ्रि सरोरुहराङ्गरुचिम्।
मुदितोऽट कलेरपनेतुमघं
यदि चेच्छसि जन्म निजं सफलम्।।

## वियोगिनी

**विषमे ससजाः गुरु समे**
**सभरालोऽथ गुरुर्वियोगिनी।**

उदा - यदवोचत वीक्ष्य मानिनी
परितः स्नेहमयेन चक्षुषा।
अपि वागधिपस्य दुर्वचं
वचनं तद्विदधीत विस्मयम्।।

## प्रहर्षिणी

**म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्।**

उदा - विद्वांसो मदि मम दोषमुद्गिरेयुः
यद्येवं गुणगणमेव कीर्तयेयुः।
तत्तुल्यं बत! मनुते मनो मदीयं
तत्कष्टं यदि पुनरेवमाह मन्दः।।

## शिखरिणी

**रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी।**

उदा - त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वयि धरणिरात्मा त्वमिति च।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं
न विद्मस्त्वत्तत्त्वं वयमिह तु यत्त्वं न भवति।।

## प्रवर्तनानि

- प्रदत्तानां श्लोकांशानां वृत्तनिर्णयं करोतु।

1. क्षोणीधरस्येव भवत्यवश्यम्।
2. अहं करोमीति वृथाभिमानः।
3. हिमालयो नाम नगाधिराजः।
4. स्मरन्ति जातिष्विदमेव नाम।
5. पूर्वापरौ तोयनिधी वगाह्य।
6. गुणप्रियं मित्रमुपात्रसज्जनम्।
7. सा मां पातु सरस्वती भगवती निश्शेषजाड्यापहा।
8. श्रुतिमपरे स्मृतिमपरे भारतमपरे भजन्तु भवभीताः।
   अहमिह नन्दं वन्दे यस्यालिन्दे परं ब्रह्म।।
9. एतत् त्रयं जगति पुण्यकृतो लभन्ते।
10. सलिलमिव विभिन्नं जाह्नवं यामुनं च।

- अधः प्रदत्तान् श्लोकानालप्य श्लोकाः कस्मिन् वृत्ते अन्तर्भवन्तीति निश्चिनोतु। ततः लक्षणसमन्वयं च करोतु।

1. नहि देहिनि शोभनं भवे-
   च्चरितार्थे सति जीवितं पुनः।
   सुतरां नटने समापिते
   स च रङ्गाद्विरमेत्कुशीलवः।।
2. किसलयमिवमुग्धं बन्धनाद्विप्रलूनं
   हृदयकमलशोषी दारुजो दीर्घशोकः।
   ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
   शरदिज इव घर्मः केतकीगर्भपत्रम्।।

3. गङ्गातरङ्गरमणीयजटाकलापं
गौरीनिरन्तरविभूषितवामभागम्।
नारायणप्रियमनङ्गमदापहारं
वाराणसीपुरपतिं भज विश्वनाथम्।।

4. तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्त स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श।।

5. ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयात् भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वात् वियति बहुतरं स्तोकमुर्व्यां प्रयाति।।

6. विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूजिता न तु धनं विद्याविहीनः पशुः।।

7. सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः।।

8. यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते।।

9. केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला

न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।।

10. किं शीतलैः क्लमविनोदिभिरार्द्रवातान्
संचालयामि नलिनीदलतालवृन्तैः।
अङ्गे निधाय करभोरु यथासुखं ते
संवाहयामि चरणावुत पद्मताम्रौ।।

11. मदनातुरचेतसोन्वहं
भवदङ्घ्रिद्वयदास्यकामया।
यमुनातटसीम्नि सैकतीं
तरलाक्ष्यो गिरिजां समार्चिचन्।।

12. अज्ञात्वा ते महत्वं यदिह निगदितं विश्वनाथ! क्षमेथाः
स्तोत्रं चैतत्सहस्रोत्तरमधिकतरं त्वत्प्रसादाय भूयात्।
द्वेधा नारायणीयं श्रुतिषु च जनुषा स्तुत्यता वर्णनेन
स्फीतं लीलावतारैरिदमिह कुरुतामायुरारोग्यसौख्यम्।।

13. दारिद्र्याद्धियमेति ह्रीपरिगतो प्रभ्रश्यते तेजसो
निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते।
निर्विण्णः शुचमेति शोकपिहितो बुद्ध्या परिभ्रश्यते
निर्बुद्धेस्तु कुतः सुखं विधनता सर्वापदामास्पदम्।।

14. स्नुतकुचभरमङ्के धारयन्ती भवन्तं
तरलमति यशोदा स्तन्यदा धन्य धन्या।
कपटपशुप! मध्ये मुग्धहासाङ्कुरं ते
दशनमुकुलहृद्यं वीक्ष्य वक्त्रं जहर्ष।।

15. एकदा दधिविमाथकारिणीं
मातरं समुपसेदिवान् भवान्।

स्तन्यलोलुपतया निवारय-

न्नङ्कमेत्य पपिवान् पयोधरौ।।

16. श्रियः पति श्रीमति शंसितुं जग-

ज्जगन्निवासो वसुदेवसद्मनि।

वसन्ददर्शावतरन्तमम्बरा-

द्धिरण्यगर्भाङ्गभुवं मुनिं हरिः।।

17. मरणमुपगतः प्रसेनवीर-

स्तुरगयुतो पतितोप्यलोकि तत्र।

कथमपि नियतिर्न लङ्घनीये-

त्यतिदयनीयमिव प्रभाषमाणः।।

18. गतं तिरश्चीन मनूरुसारथेः

प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः।

पतत्यधो धाम विसारिसर्वतः

किमेतदित्याकुलमीक्षितं जनैः।।

19. दुन्दुभिस्तु सुतरामचेतन-

स्तन्मुखादपि धनं धनं धनम्।

इत्थमेव निनदः प्रवर्तते

किं पुनर्यदि नरः सचेतनः।।

20. प्रकृतिवशगशाम्बरीविलासं

दृढमवयन्नपि स स्वयं मुकुन्दः।

झटिति गलतलावरुद्धबाष्पो-

द्गतिरचलन् पदतः पदं स्थितोऽभूत्।।

21. उद्योगिनं पुरुष सिंहमुपैति लक्ष्मीः

दैवं प्रधानमिति कापुरुषा वदन्ति।

दैवं विहाय कुरु पौरुषमात्मशक्त्या

यत्ने कृते न यदि सिद्ध्यति कोऽत्र दोषः।।

काकः कृष्णः पिकः कृष्णः
को भेदः पिककाकयोः।
वसन्तकाले सम्प्राप्ते
काकः काकः पिकः पिकः।।

❖

अयं निजः परो वेति
गणना लघुचेतसाम्।
उदारचरितानां तु
वसुधैव कुटुम्बकम्।।

❖

उदये सविता रक्तः
रक्तश्चास्तमये तथा।
सम्पत्तौ च विपत्तौ च
महतामेकरूपता।।

❖